पं० चूनीलाल 'सूदन' विरचितम्

काश्मीर-विहरणम्

सूदन प्रकाशन

जवाहर पार्क बेहट रोड

सहारनपुर (उ० प्र०)

पं० चूनीलाल 'सूदन' विरचितम्

काश्मीर-विहरणम्

(संस्कृत गद्यकाव्यम्)

सम्पादक :
डॉ० कृष्णलाल शर्मा 'सूदन'

सूदन प्रकाशन
जवाहर पार्क बेहट रोड
सहारनपुर

प्रकाशक :

सुशील कुमार शर्मा 'सूदन'
प्रशान्त कुमार शर्मा 'सूदन'
अंशुमान शर्मा 'सूदन'
अमितोज शर्मा 'सूदन'

सूदन प्रकाशन :

जवाहर पार्क बेहट रोड,
सहारनपुर

← सर्वाधिकार प्रकाशक आधीन →

प्रथम संस्करण	*	*	१९७६
प्रतियाँ	*	*	२५०
मूल्य	*	*	१०.००

मुद्रक :

आलोक प्रिंटिंग प्रेस
जवाहर पार्क बेहट रोड,
सहारनपुर

समर्पणम् —

काश्मीरजनताजनार्दनेभ्यः —

काश्मीर-विहरणम्

* विषय-सूची *

क्रम संख्या	विषय	पृष्ठ संख्या
१.	काश्मीरागमनम्	१-६
२.	शिकारा (नौका) विहरणम्	६-११
३.	शालारोद्यान विहरणम्	११-१३
४.	निशातोद्यान विहरणम्	१३-१५
५.	सत्सङ्गे प्रवचनम्	१५-१६
६.	भगवती क्षीरभवान्यादर्शनम्	१६-१८
७.	प्रवचनम्	१८-१९
८.	चश्माशाही विहरणम्	२०-२५
९.	श्री नगरावलोकनम्	२५-२६
१०.	लद्दाख वासिनः	२७-००
११.	श्रीचन्द्रस्य स्थानावलोकनम्	२८-३०
१२.	श्रीशंकराचार्य मन्दिर दर्शनम्	३१-३४
१३.	श्रीनगरावलोकनम्	३५-३६
१४.	अमरनाथ यात्रा	३७-००
१५.	पहिलग्रामा विवरणं	४१-००
१६.	मामलेश्वर दर्शनम्	४२-४४
१७.	चन्दनबाड़ी पर्यन्तम् यात्रा	४५-४७
१८.	पिस्सु घाटी	४८-४९
१९.	शेषनाग शिविर वृत्तान्तम्	५०-५२
२०.	पञ्चतरणी शिविरे	५३-५४
२१.	अमरनाथ गुहामार्गम् दर्शनञ्च	५५-५८
२२.	प्रत्यागमनम्	५९-६१

—*—



लेखक—पं० चूनीलाल 'सूदन'

शास्त्री, 'विद्याभूषण'

प्रस्तावना

नानाविध–साहित्य–विभूषते–संस्कृत––साहित्ये बहुविधानि रचितानि काव्यग्रन्थानि सन्ति, परन्तु यात्रासंस्मरण समन्वित साहित्यस्याभावमेव परिलक्ष्यते । वर्तमानकाले जीवनस्य विविध क्षेत्रेषु यत्परिवर्तनमवलोक्यते तत्र यातायात क्षेत्रे च विशिष्ट सफलता समधिगता विज्ञानेन ।

विज्ञानप्रधानयुगेऽस्मिन सम्पूर्णविश्वं एकनीड़इव सञ्जातम् । वयं तु अन्य ग्रहमण्डलेऽपि गृहाङ्गणवत् विचरामः । अतः साहित्यरचनाक्षेत्रमपि परिवर्तनेनास्पृष्टं नावतिष्ठति । सर्वस्मिन् विश्वसाहित्ये यात्रासंस्मरण विषयक साहित्यस्य किञ्चिदाधिक्येनैव प्रत्यङ्कनं दृष्टिगोचरं भवति । प्रस्तुत रचनायां दैनंदिनी सरणिमवलम्ब्य एकानव्या–यात्रासंस्मरणशैली, संस्कृत साहित्याकाशक्षेत्रे देदीप्यमान नक्षत्रमित्र प्रतिष्ठापिता ।

अन्यदेशेषु देशाटनं अध्ययनान्तरगत एकः परमावश्यको विषयो मन्यते, तेनाध्येतृणां तद्देशज्ञानमपि पूर्णतामुपैति; देशाटनं ज्ञानवर्द्धकमस्ति । देशाटनेन मनुष्यस्य दृष्टेः विकासः, तस्य सहानुभूतेः आत्मनश्च विस्तारो भवति । अस्माकं देशे विद्यार्थिनः देशाटनावसरस्यानुपलब्ध्या देशस्य विभिन्नभागानां प्रत्यक्षज्ञानादनभिज्ञा रहिता एवावतिष्ठन्ते ।

काश्मीरप्रदेशः भारतभूखण्डे स्वर्गतुल्यः मन्यते । धवलमण्डिततुङ्ग-शृंगस्य नगाधिराज हिमालयस्य उत्सङ्गे काश्मीरस्य मनोहारिणी उपत्यका विद्यते, यत्र मुदितेन मनसा पुण्यसलिलोसरितो नृत्यन्ति, सकलरवा गिरि निर्झरा गायन्ति । उपत्यकासु डलझीलमभितः परिधिगतानां द्रुमाणां

माला इव अवतिष्ठते । भास्करेण हेमाभधारिषु हिमाद्रि शृंगेषु मन्दं मन्दं प्रवहन संकलसंताप संहरन्, पथिकजन नवीनां स्फूर्ति वितरन्, विकसित विविध कुसुमकेसरसुरभिसंचयं विदधन्, सर्वेन्द्रियाणि च तोषयन् सुखद-समीरणः संसर्ति । मञ्जु गुञ्जतां मधुकराणां पटलानि सञ्चरन्ति । अतः काश्मीरस्य अपूर्व सुषमायां साक्षादिव भगवदल्लीलां अवलोकयतः कस्य सरस हृदयस्य सौन्दर्यचेतना न प्रबुध्यते ।

काश्मीरस्य मनोहारिणी उपत्यका सौन्दर्येण विद्यया विभवेन, विलासेन, वैदग्ध्येन, वाणिज्येन, शिल्पेन विश्वविजयं विदधती इव दरीदृश्यते । श्री अमरनाथ दर्शनाय सहस्रशो धर्मात्मानः जनाः, साधवो, ब्रह्मचारिणः, सन्यासिनः, तपस्विनः गृहस्थाश्च परया श्रद्धया विश्वासेन च प्रतिवर्ष समागत्य स्वजीवनञ्च कृतार्थयन्ति ।

युगमहर्षिभिः ब्रह्मलीनैः मम पूज्य पितृवर्यैः रचितानां "भगतसिंह-चरितामृतम्", "काश्मीर-विहरणम्" प्रभृति ग्रन्थानां सम्पादनसमयो अत्यव्यस्तता कारणेन, मया तेषां जीवितवेलायां समयो नासादितः, इदानीं कार्यमिदं सम्पद्यते इति प्रमोदस्य विषयोनूनम् । आशास्यते च यन्नवीनेनानेन प्रयासेन यदि कस्यचिदपि स्यादुपकारः लेशतोऽपि तदा श्रमोऽयं सफलतामेष्यतीति ।

श्रीसुशीलकुमार 'सूदनः' एतत्पुस्तक प्रकाशकः, सुश्रीचन्द्रकान्ता प्रूफ़संशोधिका अस्माकं प्रभूत धन्यवाद पात्रम्, येनौदार्येणास्य प्रकाशनमुप क्रान्तम् ।

कृष्णलाल शर्मा 'सूदन'

* श्री गणेशाय नमः : श्रीशारदायै नमः *

काश्मीर-विहरणम्

पुरा महर्षिकश्यप-प्रजापतिना स्वाधिष्ठानाय संसाधितौ भूप्रदेशः इति श्रावं श्रावं तदवलोकनाय चिरान्मनसि कामना समुदैत्। परन्त्वद्य द्वात्रिंशद् श्रावण कृष्णपञ्चम्या दैवेच्छया लब्धावसराऽमृतसर नगरात् प्रातः नववादन-वेलायां स्वचालितयान-अयनं (बसस्टेशन) उपजगाम् । स्वचालितयान-अयनं ग्रहण-समकालमेवेको बसो निर्गतोऽन्यबस प्रतीक्षायामेका होरा व्यपगता। ततो सार्धैकापशवादने सार्धाष्ट मुद्रोपलभ्यां शुल्कचिदिकामादाय जम्बूवाहन-मारूढः । चरणोपनतञ्च चिरायु कृष्णलालं शिरस्युपाघ्राय शुभाशीभिः समायोजयम् । वाहनस्यप्रयाणध्वनिं श्रुत्वा ममास्तरणं वाहनोपरि निधाप्य भारवाहकेन निर्जगाम । वाहनोऽपि पूर्वं मन्थर गत्या सुधासर नगरात् प्रासरत्। नगरसीमामुल्लघ्य तीव्रगत्या मार्गगतान् विविध खेट खर्वट ग्रामाश्चोतीर्य बटाला, धारीवाल, गुरदासपुर, पठानकोट, लषणपुर, माधोपुरादिकान्त प्रसिद्धनगरानतिवाह्य पादोनचतुर्वादनावसरे जम्बूनदसैन्यशिविरमतिलंघ्य जम्बूनगरात् पूर्वं त्रिचतुर्मीले अस्थायीनिर्मित सेत्वारोहणे विकृतस्तत्रैव न्यषीदत । चालकोपचालकौ विविधोपकरणैः वाहनसमाधानौ संलग्नौ, परन्त्वहं बहुभिः यात्रिभिः सह ततोऽवतीर्य स्वास्तरणञ्च ततोऽवतार्य मुद्रिका-द्वयं प्रदाय टैक्सीमारुढ़ः तच्चालकोऽपि तूर्यमेव रघुनाथ मन्दिरमनयत्। भारवाहकेन च मार्गोपयोगिभारं समुत्थाप्य धर्मशालायामगच्छम् । मामेकाकिनं मत्वा तत्प्रबन्धकेन भित्तिमञ्जूषा मह्यमर्पिता । तस्यां सम्भारभारं संस्थाप्य क्षणं विश्रम्य च धर्मशालोपलग्नां पण्यशालामगस्य त्रिंशत्पणोपलभ्य चायपेय-मुपादाय श्रान्तोऽपि गरिमामयं दूरतो दर्शकान् मोहयन्त रघुनाथ मन्दिरं परमौत्सुक्ष्येनोपजगाम तत्र च भव्यं विशाल दर्शनं श्यामस्वरूपं सानुजजनक-जाभ्यां चिरमपश्यम् । साष्टाङ्गं प्रणम्य च श्रीरघुनाथ समक्ष मन्दिरे घृतमालाञ्जलिं परमरमणीयां हनुमत्प्रतिमां किञ्चित्सुप्राणमिव दृष्टवा मन्त्रमुग्ध इवाभवम् । ततोऽयमन्दिराणि परिक्रमाक्रमेण दर्शनं कृत्वा स्वस्थाने न्यवर्तन् । किञ्चिद्विश्रम्य पाकपण्यशालायां किञ्चिदुपादाय भूमौ स्वास्तरणं प्रसार्य शयनञ्चक्रे ।

प्रातः पञ्चवादनावसरे शैयाम्परित्यज्य नगराद्दूरप्रदेशे शौचादिना निवृत्य दन्तधावनपूर्वक धर्मशालाया राकतः स्नानागारे स्नात्वा शालग्राम पूजापूर्वकं सन्ध्यामुपास्य प्रसादं गृहीत्वा-श्रीरघुनाथ दर्शनायागच्छम् । तत्र विधिवत् पूजा नमस्कारं कृत्वा कियत्कालं श्रीरत्नचन्द नामक पुजारि पार्श्वेऽतिष्ठम् । तमापृच्छय पुनः परिक्रमाया स्थित मन्दिरे एकादशावतार विग्रह सपादलक्ष शालग्रामान पुजारिभिरर्च्यमाना अपश्यम् । तत्र पृथक् द्वित्रैः पुजारिभिः प्रबन्धविषये कृतापवादं वार्तालापं श्रुत्वा तदनुमोदने, बाढमित्युक्त्वा श्रीरघुनाथमन्दिरे प्रथमकक्षायां महाच्छित्रलिङ्गस्य दर्शनं कृत्वा, महाराज्ञः श्री रणसिंह प्रतिमा मणिमण्डितं स्वर्णशिखर महन्मन्दिरमवलोकयम् ।

केषुचिन्मन्दिरेषु पुष्कल मात्रायां स्वर्णकलश समाधृता आसन् । मध्यान्हे च सूर्यतपे स्वर्णशिखरं स्वर्णकलशाश्च चमत्कुर्वन्ति स्म । ततः भोजनादिकं विधाय कणकपण्यवीथ्यां एकं तत्रत्यं चिरदृष्टमित्रं मिलितुं जगाम । किन्तु तत्र गत्वा तद्गृहमार्गम्पृष्टस्तत्प्रतिवेशिभिरुक्तं यदसौ षण्मास पूर्वं दिवं गतः । तत्पत्न्यै समवेदना प्रकटयित्वा स्वनिवेशम्प्रत्याजगाम । किञ्चिद्विश्रम्य विशेषवाहनस्य विंशति मुद्रालभ्यो शुल्क चिट्टिकं प्राप्य श्रीनगरं यातुमुत्सुकः तां रात्रिमतिवाह्य प्रभाते क्षीण प्रकाशे घटिकामवलोक्य भ्रान्त्या त्रिवादन चतुर्वादनं मत्वा समुत्थाय संक्षेपेण कृतनित्यक्रियः षट्वादन-वेलायां बसस्टेशनं समागतः । भारवाहकाय कर्गल मुद्रां दत्त्वा तत्रैव आस्तरणे परिन्यषीदम् । ततः दशमिनटोत्तर सप्तवादनवेलायां तदशाङ्कित आशिरस्का सन्दचामुपविष्टः मद्विष्टरः लग्नो विष्टरदत्तभाटकोऽपि रिक्त इति तस्मिन् श्रीमद्ठाकुरा उपविशन् वाहनन्नगरे मन्थरवेगेन ततो बहि तीव्रवेगेनाधावत् । नगराद्बहिः प्रथमं पर्वतकूटा अदृश्यम् पश्चादुच्चशिखर पङ्क्तया समारब्धा । वाहन-सञ्चालकः दक्ष आसीत् । प्रथमं पञ्चविंशति मील गत्या वाहनम-चालयत् । तदनन्तरमेकस्य कृत्रिमगुहायां निविष्टः बसवाहन पञ्चदश विंशति मील गत्या प्रासरत् । ततो नववादानवसरे वटोटाख्य पर्वतीय नगरे एकस्य सिंहहोटलस्य समक्षे बसं स्थापयित्वा अत्रैव भोक्तव्यं पातव्यं, यतो मार्गोऽग्रे स्खलितो भ्रष्टश्चेत्युक्त्वा तत्रैव क्वचिन्न्यलीयत ।

श्रावणसमकालमेव सर्वे यात्रिणो वाहनादवतेरुरहमपि च । भोजन-शालायां निविष्टाः सर्वे स्वरुच्यनुकूल सामिष-निरामिषभोजनं चक्रुः ।

तद्दृष्टवाऽहमेतः निषण्णो व्यचिन्तयम्–यत्कथमत्र मया भोक्तव्यम्। तदैकः सैनिकः मां प्रत्यब्रवीत्–भो! मया सह समागच्छ अग्रे पण्यवीथ्याम् वैष्णव-भोजनशाला विद्यन्ते तत्र भोक्तव्यम्। तदनुसारं एकस्यां पण्यशालाममुञ्जम् यात्रिणः सर्वे चिन्तिताः व्यचारयन् यत्किमत्रैव रात्रिरतिवाह्या भविष्यति इति खिन्ना इतस्ततः परिहिण्डमाना आसन्। सार्धद्विवादनावसरे कानिचिद् वाहनानि उद्धारितस्थानात् समागच्छन्, यत्र मार्गस्य उद्धार अक्रियत्। परन्तु वाहन चालकः क्वचिद्गतः तदन्वेषणे रता केचिद् युवनोऽन्य वाहनानि अग्रप्रसर्पंतो निरीक्ष्य अनर्गलवाहन ध्वनिकरणेन सत्वरित त्वरितः समागत्य वाहनञ्चालनाय सन्नद्धो वाहनवारान् वाहनध्वनिना अकारयत्। वाहनञ्च प्रचोदितं दृष्टवा सर्वेजना समारुढा गिरिकर्तितटावलम्बि मार्गे बसः प्राधावत्। वर्षासीकरा वाहनोद्घाटित पक्षद्वारेभ्यः जनान् उद्वेलितान चक्रुः। तस्मिन्नेव समये वैदिकी चन्द्रभागा दृष्टिपथमवातरत्। क्वचित्पङ्के क्वचिज्जाविले मार्गे सरन् बसः यात्रिहृदयानि व्याकुलयन् ऊर्ध्वोऽधः जनै मार्जीर इव प्रतीतः धावमानो मार्ग हसयति स्मः। नीच्चै आतप प्रसारित पट्टिका इव दृश्यमाना पर्वतदरीषु पिञ्जरे निबद्ध सिंह इव गर्जन्ती अच्छदच्छ वारि कलोलैः क्रीड़माना प्रियार्णव मिलन सुखमनुभवितं वेगेन धावति स्म। एकतः उच्चपर्वतशिखराऽधश्च वहन्ती चन्द्रभागा शिखरि कर्तितटोत्खनित-संकीर्ण-मार्गे वाहनम् प्रतिघण्टा पञ्चदशमील गत्या प्राचलत्। पुनश्च महत्ताऽवरुद्धं वाहनम् तन्निकट एव भ्रष्टमार्गस्य उद्धारः बुलडोज़रैः क्रियते स्म। अर्धहोरानन्तरं मार्गः पुनः संसाधितोऽभवत्। पुनः गिरिसंलग्नं प्रसर्पन वाहनः प्रवहण गत्याऽधावत। पर्वतशिखरः कदाचित् भुजाभ्यामन्योन्यमालिङ्गतः विकट पर्वतशिखरान् अधोभागे च प्रसर्पमाणां नदी दृश्यान्यवलोकयत् कस्यच्चित् कालात् पर्वतानां घर्षयन्ती अधोऽधः स्वमार्ग नयन्ती समतलञ्च कुर्वन्ती प्रवृत्ता। कश्चैनां समुद्रमार्गं दर्शयति। इतस्ततो भूरिजलप्रपाताश्च उन्नतगिरिशृङ्गेभ्यो झरझर ध्वनिना मोदकरा नद्या उत्कृष्ट साहसेन नदी संगच्छन्ते स्म। अन्ये च प्रवर्षणाज्जाता प्रवाहाऽपितस्यां सममिलन्तो कलरवेण परममोदं प्राकटयन्।

इत्थं कृतिकौशलं विधातः प्राकृतसौन्दर्यं पर्वतेषु वानस्पति विविधे समृद्धिमवलोक्यन् मन्त्रमुग्ध इवाभवम्। विचित्रपक्षिणां कर्णसुखं कलरवं श्रुत्वा लघुवृहद्-वाहनाञ्च तीव्रगत्या यातायातं निरीक्ष्यापि अकारणं हृदन्तरौ-

त्सुक्यकारणं ज्ञातुं नाशक्नुवम् । इत्थं पञ्चवादनावसरेऽस्माकं वाहनम् सञ्चालक स्फूर्त्या भारतसर्वकारेण नवनिर्मापितं कृत्रिमकन्दरायां प्रविष्टा द्वारे तस्या सतर्को प्रहरिणो वाहनमत्ररुध्याऽऽह्य च इतस्ततो दृष्टिविस्फारयन्तो निरीक्ष्य तस्मादनारुहन् वाहनमपि मन्थरगत्या अन्धकारपूर्ण गुहायाम्प्राचलत् । वाहनचालकेन वाहनाभ्यन्तरीयसाधनैः प्रकाशः कृतः । तत्प्रकाशेन मार्गनिरीक्षन् गुहाभ्यन्तरतः स्रुवमाणजलधारासु वाहनं चालयति स्म । उपदशमिनटानन्तरं बाह्यप्रकाशेन इतस्ततो गुहामार्गो निरीक्षितः । तस्माद्बहिर्निस्सृत्य वाहन-मतिष्ठत् । गुहा विषयक वार्ता प्राचलन् । केनचिदुक्तमस्या निर्माणावसरे शर्मनदेशीया शिल्पवैज्ञानिका समाहूताः परामर्शाय । अन्येनोक्तं यद्वयं गुहाखननं करिष्यामः, परं खनने यन्खनिजपदार्थमुपलभ्येत तदस्माकं भविष्यति तेषां पणं श्री जवाहरलालनास्वीकृतं स्वदेशीय शिल्पविज्ञैरेव विस्फोटकपदार्थैरूपत्घा-टित पर्वतोदरं तस्मान्निसृत-एको महाननगरः । खण्डशः कृत्वा तं भारवाहक वाहनद्वये निधाय ततोऽपाकृतः । उच्यते यत् गुहाखननात्पूर्वं जम्बूतः श्रीनगरं यातुं मध्ये एकारात्रिः यापिता भवति स्म । त्रिंशद्-चत्वारिंशत मीलानामन्तर मेतस्या निर्माणेन स्वल्पं जातम् । तदेकतः समीप एव स्रोतोऽपि विद्यते यस्य जलप्रवाहः वितस्तां सम्वर्धयति । किन्त्वितो पूर्वमेव चन्द्रभागा मार्गपरिवर्तनं क्वचिन्मिलासञ्जाता । तथापि पर्वतीय जलस्रोतसा एव सलिलमेकामन्यां नदीं निरमापयत् ।

तद्गुहामारभ्य पर्वतणदलग्नानां कल्मकेदारक्षेत्रैः सुशोभितानां ग्रामाणां नयनाकर्षकं-दृश्यं यात्रिणां मनांसि लोभयति । पर्वतमध्ये पर्वतीय नदिका-सलिलेन-पुष्टानि-उद्यानानि क्षेत्राणि च प्रभूत राज्यश्च शोभन्तेतराम् । मधुर लवणानिभुपभुञ्जमाना यात्रिणः किञ्चिद्विहृत्य पुनः स्वचालितवाहने समारूढ़ा भवन्ति स्म ।

सायन्तने सप्तवादनावसरे स्वचालितवाहनं अमितोमनोहर दृश्यैः समाच्छन्ने समतलमार्गे पञ्चविंशतिमील गत्याऽधावत् । सार्धाष्टवादनवेलायां प्रकाशपुञ्जैः समुज्ज्वलिते श्रीनगरेऽस्मद्वाहनं समागच्छन् । ततोऽपरूढा यात्रिणः उपवर्तनसम्भारान् बद्धास्तरणास्च वसाछादनात् अवतारितवन्तः । ततश्च भारवाहकानां अतिथिशालास्वामिनां महान सम्मर्दः यात्रिवर्गमवां रुध्यन् ।

न्यूनतोन्यूनं पञ्चषणमुद्रा व्ययेन दैनिकनिवासं उपार्जितुं शक्यम् इति कथयन्तोऽपरापरयात्रिणः श्रावृण्वन्ति स्म। ततो ह एकेन भारवाहकेनाहं भारमुत्थाप्य भारकोपलभ्य मोटरं प्रायाम। श्रष्टाणकं भारवाहकाय दत्वा मोटरचालकं गुरुद्वारा यातुमादिदेश। पञ्चष मिनटामनन्तरं गुरुद्वारासमक्षम्मोटरं स्थाप्यावतीर्य च ततोश्चालकः मुद्रात्रयं दातुमचकथयत्। तदर्प्य तस्मै तेनावतारितं श्रास्तरणं द्वारोपरि श्रस्थापयम्। तदैवैक युवकसिंहः, श्रहो कष्टमिति ब्रुवन्मम हस्तादादायास्तरणमुपरिकक्ष जगाम। श्रहमपि तेन निहितास्तरण पार्श्वेऽतिष्ठम्। स च युवकः न जाने कदा गतः। तिमिरावृते काष्ठबहुले तस्मिन् भवने स्थित इतस्ततः निरीक्षमाणः कथम्भविष्यति स्थानं लप्स्ये न वा इति चिन्तयन्तासम। तदैव एकोनीलोष्णीषधारी स्थूलदेहः सिक्खः समागत्याब्रवीत—भोः श्रत्र नास्ति स्थानं निवसितुमवरुद्धं सर्वस्थानम्। तथा समये एवान्यत्र निरीक्षणीयो निवासः।

तदैवेकोऽन्यो नीलोष्णीषधारी सिक्खयुवा समागत्यऽपृच्छत्—भो! तमाल पत्रादि धूम्रपानं करोषि। नाहम् धूम्रपान करोमीत्युत्तरं श्रुत्वाऽन्यान्ययात्रिणः माञ्च नीत्वा द्वितीय मण्डले एकं विशालकोष्ठं दर्शायित्वा विद्युत-प्रकाश्य च श्रास्तरण-प्रसारणाय निरदिशत्। तत्र स्थण्डिल एव द्वादश पुम्यात्रिणां श्रासनानि लग्नान्यासन्। श्रहमप्येतः श्रास्तरणमुद्घाट्य पश्चिमां सन्ध्यां तत्रैवोपास्य गुरुद्वारा-पृष्ठ संल्लग्नायां वैष्णवभोजनशालाँ किञ्चिदभ्यहार्यं मुद्रा दत्वा स्वोपवेशनं प्रत्याजगाम्।

श्रान्तत्वात् क्षिप्र मे निद्रानिमग्नोऽभवम्। श्रर्धनिशोथे मन्दप्रकाशे द्वयोः सिक्खयोः मन्दं मन्दं प्रलपतोः वचनान्यश्रृण्वम्। तौ च मत्कुणैः दष्टौ परस्परमकथयताम्-यदि मे कथं निद्रानिमग्ना श्रभवन्। खटमलानां कारणादावां पलकमेकमपि न सुप्तौ। इत्थं हस्ते गृहीतोपानत्कौ मत्कुणानपिष्टाम् भित्यां चलन्ती मत्कुणपंक्ति दलित्वा पुनः वृहत्तरीम्प्रसार्यं सुप्तो तच्छ्रुत्वा खटमलानां विचारेण ममापिनिद्रा निलीना चतुर्वादनावसरे मुस्लिम धर्मं स्थानात् ध्वनिविस्तारकमाश्रित्योद्बोधक प्रार्थनावाक्यानि कर्णं गोचराण्यभवन्

स्वसंस्कृते संस्कारान् ख्यापयितुं प्रभावयितुञ्च तेषामेषाम्परम्परा तथा च मुस्लिमप्रधानोऽयं प्रदेशं इति विचारयन्नेव कपिञ्जलपक्षिणां हृदयाहलादक रुतानि श्रुत्वा निरुक्तोक्त कपिञ्जल निरुक्ति विचिन्त्य च वैदिक ऋषीणां गम्भीराध्ययन-पद्धति-मनसि संस्तूय उद्बुद्धो काष्ठ सोपानादवतीर्य अत्यन्त जुगुप्सितमस्वच्छ शौचालये मलोत्सर्गं कृत्वा क्षिप्रानि बहिरागच्छम् । बहिश्च शौचालयं गन्तुं क्रम-पंक्ति निषण्णां दृष्टवा मनसि आत्मनः अहोभाग्यं विचार्य तदेक पार्श्वे जलदनले हस्तेपदौ प्रक्षाल्य दन्तधावनपूर्वक-मुखं प्रक्षाल्य तत्रैव स्नात्वा स्वच्छपात्रं जलेन परिपूर्य उपर्यागच्छम् । कोष्ठकोणे स्थण्डिलं संशोध्य शालग्राम पूजा विधाय पूर्वासन्ध्यामुपास्य केशान्-अभिमर्द्य काङ्कतिका च कृत्वा स्वच्छवस्त्राणि परिधाय शिरस्युष्णीषमुपवीय स्वास्तरणं वस्त्रकोशश्च बद्धवा हस्ते-पुस्तक-माला-जलपात्र-झोलकं गृहीत्वा गुरुद्वारा प्रबन्धकादेशेन तस्मिन् जनशून्य कोष्ठकदेशे द्रव्यसम्भारान् संस्थाप्य तस्मिन् कपाटं दत्वा यन्त्रं न्यरोपयम् ।

सर्वतोऽनभिज्ञः क्व गच्छामि कथं वर्तेयमत्र इति विविधकल्पना प्रवण एकतः विस्तीर्ण राजमार्गेऽपि- अतिशयेन सम्मर्दकारणात् स्ववामतः उपमार्ग पटिकयां प्राचलम् । ऊनशतपदानि गत्वा वितस्ता सेतुमपश्यम् । एषा च नगरं द्विधा विभजन्ती, वट द्वयमंलग्नो भव्य प्रासाद पंक्तिभिः उभयतश्च गगनचुम्बी शिखरैः धर्मस्थानैः राजकीय भवनैश्च यावद् दृष्टि दूरतो दृश्यमानै द्वित्रैः सेतुभिश्च परमरमणीया रमणीवमन्थरगत्या प्रवहति ।

ततः सेतुमुत्तीर्य लालचौक नाम्ना प्रसिद्ध विशाल-चत्वरमपश्यम् । तत्रैकतः प्रातः शाकादिकानां विक्रयणम्भवति, सर्वस्मिन्नहनि विशाल जन सम्मर्दस्य यातायात प्रदृश्यते। स्वचालितयान (बस, स्कूटराणां) घर्घराहटेन कर्णौ स्फुटतः। दशवादनवेलायामहमेकस्यां पण्यवीथ्यां प्राविशम् । आहिण्ड-मानो इतस्ततो दृष्टिं प्रसारयन्नपसारयन् तत्पण्यवीथ्यां अन्तिमभागे, एकस्या-मनुद्घाटित पण्यशालाया अनावृते बहिर्भागे उपाविशम् । ततोऽग्रेऽन्य राज-मार्गेऽपि मोटर-टांगा-स्कूटराणां- नदी वहति स्म । किञ्चित् त्वद्दर्शं 'दर्शं' दृष्टि घूर्णिताऽभवत । ततोऽहं स्वझोलकं गृहीत्वा तदनुलग्नायामन्यस्यां पण्यवीथ्यां प्राचलम् ।

ततः एकम्प्रयान्तं भव्यदर्शनं ब्रह्मचारिणं दृष्टवा मुदितोस्तत् पार्श्वे गत्वा तमपृच्छम्–कमपि तादृशं स्थानं ब्रूहि यत्र विद्वत्समागमो भवेत् । चकित दृष्टया मामपरिचितमवलोक्य ममनामधामादिकं पृष्टवा मह्यम् मीनाकदले एकमुच्च कृष्णप्रस्तर शिखरं हनुमत्मन्दिरं संकेते प्रदर्शय तूर्णमेव स्वाभिमत स्थानं प्रयातः अहमपि तन्मन्दिर-दिशामगच्छम् ।

निम्नद्वारेण प्रविश्य संगमर्मरस्य श्वेत कृष्णशिलानि कुट्टिमविशालाजिरे अत्युत्कृष्ट समुन्नत वितस्ता तटानुलग्न श्रीरामदूतस्य मन्दिराभिमुखे स्थित्वा संस्तुत्य साष्टाङ्गं प्रणम्य तदग्र एव उपाविशम् । हनुमतो विशाल कृष्णवर्ण प्रतिमां निरीक्ष्य पुजारिमपृच्छम् । ईदृशयै वेषा शिरः प्रकम्पय प्रावोचत् । मामुपविष्टं बहवो साधवः सद्गृहस्थाश्च पर्यवेष्टयन् । ज्ञानयोगोपासना विषये चर्चा प्रवृता । तत्रैकः सभ्य सौम्यवेषः मुसलमानोऽकथयत् यत्स्कन्धावलम्बिझोलके यदेव वस्तु पूर्वतो निधापितं स्यात्तदितर वस्तुतस्मात्कदापि नोपलब्धुं शक्यते, तथैव प्रारब्धादेव (यत्पूर्वजन्मोपार्जित कर्मणः) सर्वं सुखदुःखं सम्पद्यते तदतिक्रम्य योगोपासना मन्त्रौषधिबलात् न किञ्चित्प्राप्तुं शक्यते प्रारब्ध फलमनिवार्यं न केनाऽपि साधनेनापकर्तुं शक्यते । तदीय नेत्रे प्रारब्ध कर्मणो रुग्णं पीडाप्रदं जातं तत्केनाप्युपायेनौषधादिना वा नीरुजं कर्तुं पार्यते । तच्छ्रुत्वा प्रावोचम्–यद्येव मन्यते तर्हि आयुर्वेद मन्त्रशास्त्र नैरर्थक्यं सञ्जायते । दैवं दैव कुर्वाणा सर्वेजना निरुद्यमाः स्युः । तथा च कर्मणि प्रवर्तयतः श्रीकृष्ण, चन्द्रस्य "कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् । इत्युक्ते विरोधः समुत्पत्स्यते । "विषस्य विषमौषधम्" इत्युक्तया ज्ञायते यत्कर्मणा कर्म परिहारोऽपि संभाव्यते । परमात्मकृपया तद्भक्तजनानुभावेन च प्रारब्धमन्यथा पायीतुं सर्वशक्तिमतः सम्भाव्यते–'मिटत कुअंक भाल के' इति रामचरितमानसे प्रतिपादितं यद्रामकृपया विपरीत प्रारब्धं अनुकूल्यते । यथापूर्वं हस्तिना भुक्तं पुनः मलोन्सृष्टञ्च कपित्थ फल पूर्ववदेव दृश्यते, तथापि तन्निसत्त्वं भवति तथैव ज्ञानिनो भक्तजनस्यवभुज्यमानं प्रारब्धकर्मापि दृश्यमात्रमेव भवति न पीड़ा शोकमोहकरञ्च भवति । यथा वा दग्धरज्जो वर्तमानि पूर्ववद् दृश्यमानान्यपि वस्तुतः नैव सन्ति एवमेव उपार्जित कृपादृष्टै भागवतस्थ प्रारब्धानि दर्शनमात्राणि भवन्ति । इत्थं प्रारब्धमपि पुरुषार्थं साधनैरन्यथापयितुं शक्यन्ते श्रुत्वाऽसौ तत्रस्थाः सर्वे प्रशशंस, मुसलमानौ ममजानुं स्पृष्ट्वा स्वरुग्ण

नेत्रस्य स्वास्थ्ये कामयामासौ मयोक्तं नेत्रोपनिषद् जपविधानेन तव नेत्रं स्वास्थ्यमापत्स्यते इति निश्चिनुहि। श्रुत्वासौ गद्गदो जातः। ततोऽसौ मदुक्तयानुसारं मां मम मित्रस्य पार्श्वे अनयत्। मां समापृच्छ्य चापावृतः। मम मित्रं ओम्प्रकाशगभीरो मां दृष्टवा ससंभ्रमम् स्वगद्दीम-परित्यज्य मच्चरणौ स्पृष्ट्वाऽतुष्यत्। अनामयम्पृष्ट्वा समुचितासने उपावेशयत्। किञ्चित्कालं सहारनपुरीय वार्तालापमावां चक्रावहे। अहमधुनैवऽऽगच्छामीत्युक्त्वा विपणितो निसृत्य गतवान् क्षणादेव विनिवृत्य हरिवातादाना, सेवतीफलानाञ्च राशिं ममाग्रे न्यधत। लौहवाटैश्चस्फोटय निष्कुलीकृत्य वातादानि मह्यमर्पयत् ततः सेवतीफलानि च स्वधितिना संस्कृत्य प्रादात्। अहमपि क्षीरिगुलिकानि सेवती फलानि संस्तुत्य संस्तुत्य उपभुक्तवान्। ततोऽपराह्णे पञ्चवादनावसरेऽकथयत्–अहन्तु चायपेयं मुसलमान भृत्येन आनयामि पिबामि च परन्त्वद्य स्वयमहं भवन्तं चायविपणिकायां नयामि। उपसर्पताम् मया सहेति। मां नीत्वा विपणिकाम्प्नोत्। तत्र भित्तिलग्न-लम्बफलकमाश्रित्य स्थिता ब्रहवोजना मिष्टान्नं भुञ्जन्ति पानादिकं पिबन्ति स्म। सर्वे जनाः स्थित्वैव चायं पिबेयु, मिष्टान्नञ्च भुञ्जेयु, चेत् कश्चिदासने उपविश्य भुंक्ते पिबति च स्वराजकीयः करः प्रदेयः स्यात्। ततः ओम्प्रकाशा-देशेन गुलाबजामन मिष्टान्नं मदीय पैपर्तल–पात्रे चायं पेयञ्च समापात्य मह्यं दत्तम्।

भुक्त्वा पीत्वा च गुरुद्वारा द्वारलग्नां जगदीशचन्द्रस्य–फल विपणिकामुपगतौ। दृष्ट्वेत्यावां वृस्या उदतिष्ठत्। अनामयम्पृष्ट्वा समासीनयोरावयोरसावपि वृस्यामतिष्ठत्। मम निवास प्रबन्धाय समचिन्तयताम्। द्वितीया रात्रेरपि मयागुरुद्वारे एव नेयैत्युक्त्वा ओम्प्रकाशाग्रहवशवर्ति भोवतुं तद्गृहेऽगच्छम्। पूर्वं मधुरपेयं पीत्वा सार्धनववादने भोजनं कृते ततो रुग्णत्वाञ्चलनेऽसमर्थेन तेन स्वकन्या मार्गदर्शनाय प्रैषत। अहमपि दशवादने निवासस्थानमागत्य आस्तरणं प्रसार्य प्रस्वापम्।

शर्वर्याम्प्रभातायां पञ्चवादनावसरेऽजागरम्। पूर्ववत्कृत नित्यक्रिया तर्हि स्ववस्तुसम्भारान् संकलय्य, कोष्ठद्वारं पिधाय, प्रातराश चाय पेयं गृहीत्वा, मलिनाम्बरन्वितं झोलकं गृहीत्वा ओम्प्रकाश गृहमागच्छम्, भोजनञ्च अकरवम्।

ततो हनुमान मन्दिरे मध्यान्होत्तरे त्रिवादनावसरे कानिचिद् वस्त्राणि प्रक्षाल्य मन्दिरं समागत्य विलन्नानि वसनानि प्रासारयम् । मन्दिरसेवक एकः साधुः लौहश्लाकयाऽवरयात् वस्त्राण्यपकातु" मामादिदेश, यतस्तैः प्रसारितवस्त्रैः पुष्पाङ्कुराणि विकृतिं यास्यन्ति । अहमपि तानि ततोऽवतार्य सङ्गमरमर कुट्टिमे प्रासारयम् । शुष्कानि वस्त्राणि सकुलीकृत्य गुरुद्वारानिवेशे समागम । वस्त्राणि संस्थाप्य अमरनाथयात्रातः परावृत्तात् एकाद् ब्रह्मचारिणा ज्ञातं इतोऽविदूरे सनातनधर्मसभाया धर्मशाला विद्यते, तत्र यात्रिभिश्च रुप्यकमेकं दिवसनिवास शुल्कं देयं भवति । तत्र स्वच्छ–शौचालय व्यवस्थापि वर्तते, इति श्रवणसमकालं तत्रागच्छम् । धर्मशालाविषये प्रबन्ध जिज्ञासुस्त्वरितं तत्र जगाम् । किन्तु सनातनधर्मसभा भवनाद् बहिरेव आसम् । तदैव जम्बू रघुनाथ धर्मशालातः एव लब्धपरिचया फ़रुखाबादस्य त्रयोब्राह्मण श्रीअमरनाथ यात्रां चिकीर्षवो, मदागमनाद्द्वितीयेऽहनि तत्र समागता माममिलन अतीव मुदितास्तेष्वग्रणीः पञ्चाशद्वर्षवया सुमुखो मुखरश्च मामवदत् भो ! अस्माभिः सह त्वया यात्रा विधेयः मधुर मधुर भोजनं स्वहस्तेन पाचयित्वा खादयिष्यामि अन्यामपि यथोचितं सेवां विधास्यामि । इति कथयत् एव एकः शिकारेवाला समागतः ।

शिकारा (नौका) विहरणम्

स च स्वचित्रयुवतं शिकाराचालक सर्वकारीयानुपत्रं सन्दर्शयऽऽब्रवीत् भवतः शिकाराद्वारा श्रीनगरस्थ विशिष्ट मन्दिराणि तथान्यान्यनेकैतेहासिक स्थानानि काश्मीर प्रख्यात शिल्पव्यवसायाश्च तथाऽन्य क्रय-विक्रयार्थं प्रसिद्ध विपणीश्च भवद्भ्यो दर्शयिष्यामि प्रत्येकस्माद् केवल रुप्यकमेकं शुल्कत्वेन ग्रहीष्यामि । श्रुत्वैव सर्वे वयं तदनुगताः । सोऽपि नो गृहीत्वा बटशाह सेतोः शिकारे (कनिष्ठ नौकायां) आरोहणाय प्रैरयत् । वयमपि नौकाया अग्रमुखे उपानहौ विमुच्य समास्तृते वृहदास्तरणे अतिष्ठाम् । वितस्ता सलिलो-

परितरन्ती नौका प्रवाहनुकूल प्रवाहे प्रावहत् । नदी तटमुभयतः गगनचुम्बि प्रासाद-पंक्तयः अतीव मनोज्ञा, हृदयावर्जका, प्रतोलिका-प्रसारित-विविधवर्ण-शाटीभिश्च वितस्तोपरिकृत व्यंजना, वातायन बहिर्निस्सारित-पद्म-वक्त्रै नदीमभ्यर्चमाना आसन् । सा च लघु नौका शनैः शनैः गणपतिमन्दिरतटलग्ना, ततोऽवतीर्य गणपतिमन्दिरेऽभ्यर्च्य निवृत्ता पुनः नौकामारुढ़ा सा च कैवर्त-कद्वयेन प्रवाहिताऽग्रे प्रावर्तत् । तटद्वयलग्न दृश्यानि विलोकयन्तो परमामोद-मुपलभमाना एकतः स्वर्णमन्दिरमपश्यम् । ततः कियद्दूरे पत्तानलग्नाया नावोऽवतीर्य मार्गदर्शकयुवकद्वयं अनुगताः । संकीर्णद्वारे प्रविष्टयोः द्वित्रा कक्ष्या अतिक्रम्य मज़दूरयूनियन नाम्ना प्रथित संगठन भवनं प्रविष्टाः । तत्र च स्वद्रास्तरणे ममासीनेष्वस्मासु पञ्चषः कार्यकर्तारोऽस्मान्परिवार्य स्थिताः । तेष्वेकोऽस्मदभिमुखं स्थित्वा विविध महार्हं ऊर्णाम्बरमुच्चयानि प्रसार्यऽब्रवीत्--भवद्भ्योः किंरोचने, शालादिकं यदभीष्टं स्याद् तदेव दास्यामि । गौरवर्णेऽयंविक्रेता कृशाधरः वाग्मी प्रभावशाली चासीत् । मौनावलम्बिनोऽस्मान् दृष्ट्वा कथयत्–नैवसंकोचो विधेयः यदेवाभीप्साध्व तदेव दास्यते यदि यात्रा समागतातामभवतां पार्श्वे द्रव्यं न्यूनं वर्तननन्विन्ता करणीया, पञ्चविंशन्ति प्रतिशत मूल्यमेव देयमन्यत्सर्वं क्रीतवस्तु पार्सले प्रेषणानन्तरं प्रदेयं स्यात् । यद्येतद्वस्त्राणिश्च क्रेष्यथ तर्हि पञ्चविंशति प्रतिशतं करमपि देयम्भविष्यति । अतो यदेवाभीष्टं तदद्यैव क्रीणन्तु-अवान्तरेऽन्यथाधिकमूल्येन क्रेयम्भविष्यति । परमस्माकं नेताऽपि पण्यववहरणे कुशलः मतिमान् परमानन्दा गम्भीरमुद्रयोवाच न ह्यस्मभ्यमभिरुचितं महर्घ्य चास्ति । वयं दिल्लीतोऽहर्निशं अनुरुपं वस्त्रादि क्रेष्यामः इत्यस्माभिः सहैव समुदतिष्ठत् । द्वाराभिलग्नौ मार्गदर्शकावस्मान् गृहीत्वा तदनुलग्नान्यकक्ष्यायां प्रावेशयत् । तत्र सीवका ऊर्णाम्बरेषु लतापुष्पाकृतीः सीवन्ति स्म । सीवेनेतेषां योगिजन समाहित चित्ततां निरीक्ष्य तद्हस्तकौशलञ्च प्रशंसंतो बहिराजगाम् । ततो विविधहस्तरचितं, विविधकाष्ठोपकरणाण्यपश्याम् ।

तथैव बहुवीथिषु भ्रमन्तः कला बहूनि क्षेत्राणि दृष्टानि, तत्रैव मार्गे पोस्टकार्यालयात् पत्राणि पत्रवेष्टनानि च क्रीत्वा प्रत्यावृता (शिकारा) लघुनौकाञ्चाश्रिताः । ततोऽग्रे कियद्दूरेऽग्रेप्रवाहिता च द्वादशवादन समये-ऽस्मदिच्छानुकूलं नौका पुनः यथागतदिशि प्रचलिता । मध्ये च तरिवाहकौ नौकां एकया गृहाकार नौकया युक्ताम् तन्नौकाद्वाराद्बहिरागत्य एक-पुरुषः शुल्कादि सम्बन्धे काश्मीरी वाण्यां तावपृच्छत् । तयोरुत्तरेण सन्तुष्टैः पुनः तरणौ प्रविष्टः । सा च लघुनौकाऽतिप्रवाहप्रतिकूल दिशि महता श्रमेण तीर्यमाना तरिवाहकाभ्याम् पुनः तत्रैव समागता यस्मात्-स्थानाद् वयं तदारूढ़ाभवाम् । तरिवाहकाभ्यां शुल्कं दत्त्वा सर्वे स्वनिवेश स्थाने जग्मुः । अहमपि पाकशालातः भुक्त्वा हनुमान मन्दिरे आगत्य विश्राममकरवम् ।

शालामारोद्यान–विहरणम्

पञ्चवादनावसरे प्रतापधर्मशालाया स्व-साथिनो शालामारोद्याना-वलोकनायऽकथयम्–तैरुक्तं यत्ते उद्यानं दृष्ट्वा प्रतिनिवृत्तास्त्वयापि तत्र श्वस्तने गन्तव्यम् । नायमवसरस्तत्र यानाय । परन्त्वत्यौत्सुक्याद् बस द्वारा षट्वादने शालामारोद्यानं प्रायाम् । तद्दिने कस्यच्चिद्देश्यस्य राष्ट्रपत्यागमने सुसज्जितमासीदुद्यानं तत्र सर्वतः विविधवर्ण पुष्पाणां छटा हृदयाह्लादिनी चासीत् । मध्ये चौक–(चतुष्कः)–कुल्या शतशः फ़व्वाराणां (जलयन्त्राणां) जलसीकरनिकरैश्चञ्चला धूम्रपटल भ्रान्ति–जनयन्तः फ़व्वारासमूहस्य तालगयेन नर्तयन्तीव मन्थरगत्या सुवासित कामिनीव दर्शकजन मनांसि रञ्जयति स्म । मध्ये मध्ये कृष्णाशिलारचित सोपानै-रुर्ध्वमारुह्य गमनेनऽपि सुगन्धित–शीतल–समीर स्पर्शेणगत क्लमः तदुपर्यु-परितोऽगच्छन् । चिकित्साविज्ञानाध्येतारः केचित् चत्वारश्च छात्रा मां समागत्याऽब्रवीत् कुत्रत्यो कदाऽत्र समायातोऽसि । सहारनपुरीयं मां मत्वा तेष्वेको हृष्टोऽवदत्–अहं मेरठनिवासी अत्र चिकित्सा अध्ययनाय काश्मीर

विश्वविद्यालयेऽधीये । एहि अत्र मुख्योत्सशिलातले निषीद अहन्ते चित्रं गृहीष्यामि–इति । तदैव तेन बिम्बाकर्षकं गृहीतम्, वीरासनेन स्थित्वा ममवहितो भवेत्युक्त्वा तत्कीलमुत्कोच्य प्रसन्नोऽभणत् यच्चित्रं सुसम्पन्नम् । मम निवाससंकेतं लिखित्वा सहारनपुरे प्रहेष्यामि अवश्यमेव । ततस्तेन बिम्बाकर्षकं मदहस्ते कृत्वा कीलोत्कोचप्रक्रिया माँ विज्ञाप्य स्वाऽन्यसखिभिः सह सम्मुखे स्थितोऽहमपि कुशल चित्रकारिताप्रदर्शनम् कृत्वा एक दोतीनेति शब्दं कुर्वन यन्त्रकीलमुत्कोचितवान् । हृष्टोऽसौ गृहीत्वा निजबिम्वाकर्षकं मह्यं प्रोवाच सप्तवादनानिसञ्जातानि वयन्त्वत्रैव अष्टवादने सर्वंकारीय कार्यक्रमं श्रोष्यामः तद्द्रष्टुं प्रत्येकस्माद्दर्शकान्मुद्रात्रयं ग्रहीष्यते आङ्गल-भाषीयं कार्यक्रमवबोद्धुमनुत्सुकः, समयोऽधिको जातः सम्प्रति प्रतिजि-गमिषामि । तर्हि तानापृच्छ्य त्वरितगत्या जहांगीरबादशाहेन स्वसाम्राज्ञ्य नूरजहाँ नाम्ना प्रख्याता या मनोविनोदायोद्यानमिमं कारयामास इति बादशाहस्यौदार्यं रसिकताञ्च ध्यायनुद्यानाद्बहिरागतः ।

पञ्चषमिनटवधिकानि प्रतीक्षयाम बसः समायातोऽहमपि बसमारुह्य पञ्चशत–पणोपलभ्यां शुल्क चिदिकां गृहीत्वा श्रीनगरे अष्टवादनवेलायां प्रत्यागतः बसादरुवह्य पूर्ववद्भूतकेश्वरं संस्मृत्य स्वास्तरणमुद्घाट्य प्रसार्यं चास्वापम् ।

अगस्तस्य द्वितारिकायामुत्थाय कृतनित्यक्रियः द्वारो पिधाय यन्त्रं दत्वा कुञ्चिकां वास्कटगुटिके निर्वर्ण्यं बहिरगच्छम् । स्वसार्थिनां समाचार मवगन्तं तद्धर्मशालायामगच्छम् । परन्ततो ज्ञातं यत्तेतु पहिलगांव प्रति प्रतस्थिरे, इति मनसि किञ्चित्क्लिन्नः श्रीओम्प्रकाशस्य विपणिकायाम-गच्छम् । ततः सायन्तने ओम्प्रकाशसमिधे जगदीशकुमारस्य पार्श्वे आगच्छम् । तत्र आसीत् सन्तरामोऽपि मां दृष्ट्वा समुतस्थतः अभणताम् यद् भवतः निवास प्रबन्धः श्री मक्खनसिंह धर्मशालायां वातादविक्रेन्त्रा

जगदीशचन्द्रेन कारितः । अतो सविधगुरुद्वारं परित्यज्य तत्र आगतवान । तत्र प्रातः समागमन कालमेव प्रासाद द्वितीय-मण्डले प्रतिष्ठापित भगवतो राधाकृष्णस्य समक्षे सत्सङ्गकरणाय प्रचोदितः । तदनुसारे पञ्चसप्त महिलास्वेव भक्तिविषयकं प्रवचनं जातम् । स्थानप्रबन्धकेन श्यामसुन्दरेण पञ्चदशदिवसावधिक पर्यन्तमित्थमेव सप्तवादनादारभ्य अष्टवादन पर्यन्तं दैनिक सत्सङ्गो भवतेत्युद्घोषितम् ।

निशातोद्यान-विहरणं

ततोऽवसरं प्राप्य प्रातराशञ्च कृत्वा निशातोद्यानावलोकनाय प्रचलितः । लालचत्वर सविधे बसस्थित्ययनम्प्राप्य निशातोद्यानाय प्रस्थानोद्यतं बसं समारुह्य चत्वारिंशत्पणकोपलभ्यं चिटिकामादाय निधाय चार्धकोटगुटिकायां स्थितः, बसोऽपि प्रचलितः मार्गे मनोज्ञनयनरञ्जक दृश्यानि बसपक्षद्वारात् दर्शन्दर्शनतीवातुष्यम् । दूरपर्यन्तं मार्गलग्नं लघुज्येष्ठ नौकाभिरास्तृतं विशाल-गम्भीर-डल-ह्रदमपश्यम् । तदुत्तरतटे गगनमुड्डीय-माना इव तरुपंक्तयोऽदृश्यन्न तस्मिंश्च स्वास्तरण समास्तृतासु विविध वर्णस्श्रेष्ठहंसादि विहगचित्रित नौकासु जलविहारं कुर्वतां जनानामौत्सुक्य पूर्ण वचनानि निशाम्य मनसि अज्ञातभावाः समुत्पद्यन्त । मार्गानुगतद्वित्रग्रामेषु आरोहण-अवरोहणं कुर्वन्तो ग्राम्यजनाः - सरला-सौम्य-प्रकृतयो लावण्य गरिम्णाः शालीनाः प्रतिभान्ति स्म । मार्गमुभयतः यावद् दृष्टिः प्रासरत् हरितमयेन वस्त्रेणेव शाद्वलेनाच्छादितो वृक्ष सम्पदा सम्पन्ना वसुन्धरा-ऽदृशम् । इत्थं दृश्यैरतृप्तनयनं सद्यो बसादवतारणाय बसोपवाहकः प्रैरयत् । ममावरोहणकालमेव बसो धूम्रतुल्यां धूलिमुड्डयत्पातयत् वेगेन प्रासरत् । अवतरणस्थानादभिमुखं कतिपयसोपानोपगम्यमुद्यानद्वारमव-लोकयम् । शनैः शनैः सोपानानि अतिक्रम्य उद्घाटित वृहत्कपाटं द्वारमुल्लं-ध्याभ्यान्तरवर्तिद्वार पक्षानुलग्नाच्छादित चतुष्क प्रस्तरमयोपवेशने न्यषीदम् ।

पार्श्वंवर्ति झोलकात् कानिचित्सेवती फलानि भुक्त्वा गतश्रमोऽग्रे महद्मार्गोभयतः कलाकृत्या निर्मित चतुरस्त्र, वर्तुल, वक्र, सरल, षटकोण क्यारिषु विकसित विविधवर्ण मनोज्ञानि कुसुम स्तब्कान्यपश्यम् । मध्ये चेष्टिकानिर्मित कुल्याऽदृश्यत । ततोऽग्रे पुनः उपत्रिशद्भिः सोपानैः द्वितीयस्तरे प्रासरम् । तत्रापि मध्ये समुन्नता कक्षा समाच्छादिताऽस्ति । तन्मध्यात्प्रपात रूपेण कुल्याजलम्पतति । वृहच्छिलोत्कीर्णच्छिद्रेभ्यो निस्सृतान्यसंख्य सलिल–कणानि प्रकीर्णमौक्तिकानां भ्रमं जनयन्ति तदग्रे कुल्यामुभयतो फलोपनतं वृक्षानि दर्शंदर्शमौत्सुक्यमवर्धत् । मध्ये देशीयविदेशीय विविध वेषभूषाच्छादित पर्यटकानां यातायातं मनोमयानन्दकरमतिमधुरञ्चानेक सभ्यता समागममेकत्रदृष्टमतीव कौतुहलं जनयन्ति स्म । कुल्यायामत्र फ़व्वारा न दृश्यन्ते । अग्रे पुनः पूर्ववत् सोपानारोहणे कृतम् तत्रापि पूर्ववद् दृश्यमासीत् । ततोऽग्रे अन्तिमारोहणमारुढ़ो परितः यावद्दृष्टिरयात् तावत् डलह्रदमेवऽदृश्यत् । उपरिवर्तिस्तरे पर्वतीयोत्सं बद्धा तस्माज्जल प्रवाही नीचैरानीतोऽस्ति । तत्र च चतुरस्त्रं महत्क्षेत्रं समीकृतं तस्य चतसृषु दिक्षा विशाल प्रस्तरपट्टिकाभि मार्गो निबद्धः । दक्षिणोत्तरे लम्बमानमार्गे स्वल्पा एव जना आसन्, तान्दृष्ट्वा केचित् ताशपत्रवृष्चका एकतो वृक्षतले पत्राणि प्रसार्य तेषु कर्गलमुद्रः प्रक्षिप्य यात्रिणो दर्शयन्ताऽलोभयन् । तदाकृष्ट एको नवयुवक तैः क्रीडितं सममिलदेव ततोऽन्ये तत्सखायः सह समागत्य तञ्च स्कन्धाभ्यामादाय समाकर्षन् । पत्ताबाज़ा अपि संख्या-बाहुल्यं तेषां दृष्ट्वा संकुञ्चिता अभवत् । अग्रेकिञ्जात तन्न जाने, किन्तु स्पष्टमेतत् यत्काश्मीर सदृश सुन्दर स्थलेऽपि वञ्चका, धूर्ताः मनुष्या पदे पदे सन्त्येव ।

अहमपि तृतीये स्तरे एकतः जलप्रणालिका परिसर उपविश्य पञ्चवादनावसरे पश्चिमां सन्ध्यामुपास्य सार्धषटवादनावसरे नीचान् स्तरादवरुढ़ः बसप्रतीक्षामकरवम् । स्वल्पप्रतीक्षानन्तरं बसो समायत् ।

स्तदारुह्य च सप्तवादनावसरे श्रीनगरं समायातस्ततोऽवरूह्य क्षिप्रमेव स्वोपवेशने समागतः । कृताहारः धर्मशालास्थितैः किञ्चित्परिचयं लब्धव स्वास्तरणेऽशये ।

सत्सङ्गे प्रवचनम्

प्रभाते परमेश्वरं संस्तुत्याऽऽस्तरणं विहाय कृतनित्यक्रियः सप्तवादने सत्सङ्गकरणाय धर्मशालायोपरिमण्डले मन्दिरमुपगम्य नमस्कृत्य प्रवचनमकरवम् । कर्मोपासना ज्ञानमार्गेषु ईश्वर प्राप्त्यै सरलमार्गमुपासनाऽस्ति । ब्रह्मणो कदाचित् जीवनसार जिज्ञासया समग्र श्रुतीनान्तिस्र आवृत्तयः कृतास्ततश्च भक्तिरेव तादृशं साधन विज्ञापितं येन भगवत्प्राप्तिः सुकराऽस्ति-"ज्ञान को पन्थ कृपाण को धारा", गो० तुलसीदासेन प्रतिपादितम् । योगमार्गोऽगुरुगम्यत्वाद् गुरुणाँ च सहजविनय वृत्याऽतिसन्तोषणमतिदुष्करमस्ति । बहवो योगमार्गे प्रवृत्ता भवन्ति परन्तु तेषु विरलः कश्चित् सिद्धिमवाप्नोति । उक्तञ्च गीतायाम्-"यत्तामपि सिद्धानां कश्चिन्मां वेत्ति तत्वतः । अतो योगादीश्वर प्राप्ति सिद्धिरपि कठिनाऽस्ति ।

भक्तया तुष्यति माधवो न तु गुणैर्भक्ति प्रियो माधवः अर्थात् यस्य क्षम्या-कृपामिन्द्र वरुणादयोऽप्यभीप्सन्ते किमुतान्य प्राकृत जनानां कथनं, विश्वञ्च यन्स्वलक्षेण भ्रान्तंमशान्तं दृश्यते । एतादृश्याऽपि लक्ष्या माधवो-व्यापको विष्णुरस्ति अतएव तन्नाम माधव उच्यते । सलक्ष्याश्रितो भगवान् रूपैश्वर्यादिभि गुणै प्रतारयितु न शक्यते । म च प्रेम्ण। वशतामिति ।

नाहं वेदैर्न तपसा न दानेन न चेज्यया
भक्त्यात्व नान्यथा शक्य अहमेवं विधोऽर्जुन

पुष्कल द्रव्य साध्यैर्यज्ञै, ईश्वरीय ग्रन्थ वेदानां निरन्तराध्ययनेन शरीरशोषकैरुग्रतयोभिश्च नाहं प्रीणामि यथा भक्त्या प्रेम्णा वश्यो भवामि । शाण्डिल्य सूत्रे भक्तिः परिभाषास्ति— "भक्तिः परानुरक्ति" । परे सर्वश्रेष्ठे सर्वाधारे चेश्वरे परोत्कृष्टा अनुरक्तिः अनन्यानुरागः भक्तिरुच्यते । अतो यावद्विषयेषु मनोऽनुरज्यते तावद् भक्तिद्वारे प्रवेशोऽतिदुर्लभः । पराभक्तेरधिकार प्राप्त्यैं–तीर्थाटन–दान–श्रवण–मनन–निदिध्यासन–शालग्रामपूजन–यज्ञा दयास्तु साधनानि सन्ति । इमे सर्वाः साधनभक्त्याः कथ्यन्ते । साध्यप्राप्तयै साधनात्यावश्यकान्येब । अथवा पराभक्ति प्रासादे प्रवेशाय श्रवणं–कीर्तन विष्णोः स्मरणं–पादसेवनं–अर्चनं–वन्दनं–दास्यं–सख्यं–आत्मनिवेदनं इत्येवं नवधा भक्तिसोपानानि भक्तिद्वारा जोवस्य परमात्मनिलयो भवति । एतदेव मनुष्यजना साफल्यम् "बड़े भाग्य मानुष तन पावा सुरदुर्लभ सद्-ग्रन्थन गावा ।"

भगवती क्षीरभवान्या दर्शनम्

अगस्तमासस्य द्वितारिकायाँ क्षीरभवान्या दर्शनायात्युत्सुको बस-अयने (स्टेशने) गत्वा अष्टाणकोपलभ्यां शुल्कचिदिका पक्षद्वारात् गृहीत्वा बसमारुढं एव मयि प्रधावितः पर्याप्त जनसम्मर्द कारणात् प्रस्विन्नोऽभवम् किन्तु क्षणानन्तरमेव बहवोयात्रिणोऽवरूढास्ततः अस्वास्थ्यमन्वभवम् डलह्‌दमार्गमतिक्रम्य पर्वतोपत्यकाया बसो प्राचलत् । ततो हरितावरणेनावृत एक तो गिरिशोभा दृष्टिमाकर्षत्, अन्यतो मार्गलग्न कलमकेदार क्षेत्राणि फलिततरु श्रेणि समावृतानि मोहयन्ति स्म । वनस्पति सौगन्ध्येन तृप्त–घ्राणोऽभवम् ।

मार्गे च गतागतं विदधतः काश्मीर जनस्य सौन्दर्य–माधुर्यं विनोदिस्वभावेन सहैव आपादलम्बमानपरिधानं विलोक्य मनसि विस्मयमावाहन भगवतीक्षेत्रम्प्राप्य बसादवरुह्याऽपश्यम् यदेकतः कतिपया खाद्यपण्य-

शाला विद्यन्ते तदनुलग्न लौहशलाकावेष्टितं बृहत्क्षेत्रं 'वस्तूनां क्रय-विक्रयार्थं पण्यवीथिका' (शोरूम) यत्पर्वकालेषु उत्सवेषु च लगति । तदातु तच्छून्य-मासीत् । ततो विस्तीर्णे राजमार्गे शतपदानि गत्वा चरणगङ्गोपरि लघु सेतुमुल्लंध्याग्रे चरणगङ्गा तटे लौहावरणलग्नस्थले एकदा पूजायै पुष्पस्तबक दुग्धविक्रेतारा: बालका, अन्यतों पदत्राणनिरीक्षकः एको बालको न्यषीदत । अहमपि गङ्गायां पादौ प्रक्षाल्य आचम्य पदत्राणानि तन्निरीक्षके पार्श्वे निधाय पञ्चाशद्भिश्च-पणकै-दुग्धं-पुष्पाणि गृहीत्वा लौहवृत्तिमपसार्य, अन्तः प्रविष्टः कियद्दूरं यात्वा शिल्पिकृत धवलित लौहावरणवृते क्षीरसदृश-सलिलपूर्ण कुण्डमध्ये समुत्थितं स्वर्णशिखरं भगवतीमन्दिरमैक्षम् । उत्तर दिशि कुण्डाग्रकक्ष्यां प्रविश्य तदेकतः शतशः दीपान् प्रज्वाल्य दुर्गापाठे प्रवृत्तौ द्वौ काश्मीरीब्राह्मणाभ्यां सहैवेकतः स्थितं पुजारिरक्षिपथंगतः, तदुक्त्यनुसारं दुग्धं पुष्पाणि च कुण्डे प्रक्षिप्य शिवशक्ति प्रतिमायुत मन्दिराभिमुखं साष्टांगं प्रणनाम । चरणामृत-प्रसादे गृहीत्वा पुजारिणाञ्च-दत्ततिलकाशीर्वादोः पुजारये किञ्चिद् दक्षिणां विसृज्य "शाकम्भरी-चमत्कार[1]" पुस्तकश्च समर्प्य ततो बहिरागच्छम् । मन्दिरस्य द्विसहस्र-वर्गगज़विस्तीर्णे सितेतर शिलेष्टिकाबद्धकुट्टिमाजिरे प्रदक्षिणां कृतवान् । तत्प्राङ्गणमध्ये विस्तीर्ण घनच्छया चिन्नारवृक्षाणां शोभां निरीक्ष्य विमुग्धं एकस्य वृक्षस्य तले निषण्णोऽतिश्रान्तत्वादनावृत कुट्टिमे कायं प्रसार्य स्थितः निमीलित नयनोऽभवम् ।

श्रान्तिमयाकृत्योत्थितो पुनः तन्मन्दिरसुष्मयाऽऽकृष्टचेता सर्वं स्वात्म कृत्यं व्यस्मरम् । क्षणाद् ध्यानात्समुत्थाय बृहल्लोहावरणाद् बहिः पश्चिम दिशि रक्षिनिवेशनमपश्यम् । ततो जङ्गलातोबहिरागत्य चरणगङ्गाकूले विस्तृत वृक्ष स्थण्डिले पञ्चनदीयद्वाभ्यां विक्रीयमाण प्रसारित विविध

---

१. पं० चूनीलाल विरचितम् पुस्तकम्—स्वनिर्मित स्तोत्रसमन्वितम् ।

वस्त्रराशौ व्यवहरन्तं काश्मीरिजनसंकुलं निरीक्ष्य तदेकतः प्रसारित कूटे स्थित्वा तेषां व्यवहरण वार्तालापं श्रृण्वन्नपि काश्मीरीभाषानभिज्ञत्वत्तन्मुखाक्षि सञ्चालनादिभिस्तङ्गितैश्च तद्भावमास्वदम् । समयक्षेपक बहुवादनानन्तर-मेकमेव वस्त्रं क्रीत्वाऽपगताः जनाः । अहञ्च चरणगङ्गाकूले पश्चिमां संध्यामुपास्य ततोऽगतः । पञ्चवादनीय बसे समारुढः सपृवादनवेलायां स्वस्थानम्प्रत्यावृतः, भुक्तवा-पीत्वेश्वरं स्मृत्वाऽस्वपम् ।

अगस्त्र त्रितारिकायां ब्राह्मे मुहूर्ते उत्थाय कृतनित्याभिवन्दन-सत्सङ्गे भक्तिमुपलक्ष्य प्रवचनमारेभे–

प्रवचनम्

श्रवणया भक्तया परमात्मपरिचयो भवति । ईश्वर महिमानं भगवतत्त्वं दयादाक्षिण्यादि ज्ञान पुर्वकमेव प्रीतिः समुत्पद्यते । ज्ञानमित्र प्रेमाग्निरपि सञ्चित क्रियमाण कर्माणि भस्मसात्करोति । कर्मणां नाशेन-मोक्षमापद्यते साधकोऽतः स्वतन्त्ररूपेण भक्तिर्मोक्षाय कल्पते । राज्ञापरीक्षता श्रीमद्भागवत श्रवणेनैव मोक्षम्प्राप्तम् । भगवत्स्वरूपः शुको भगवच्चरित्र कथनेनैव मुक्तोऽज्ञायत् । षण्मासावधिकं द्वादशाक्षर विद्या स्मरन्ध्रुवो भगवत्साक्षात्कारभकरोत् । पादसेवायां लक्ष्म्या आदर्शो प्रसिद्धः । कदाचित्-कोऽपि साधकः कर्मरूपमास्थाय सागरे शेषासने विराजतो विष्णोः चरण स्पर्शनाय प्रायतत् । तदेकत्तो शेषनागो फूत्कारेणान्यतो लक्ष्मीस्तं न्यवारयत् । किन्तु भक्तसुहृद्भगवान् तन्मनोऽभीष्टं रामावतारे पूरितमासीत् । वनवासे जाह्नवीभुत्तरितुं सीतालक्ष्मणाभ्यां सहितः श्रीरामो यदा कैवर्तकपार्श्वे गतस्तदा तेनोक्तं—हे राम ! श्रूयते यत् तव चरणरजसा स्पृष्टा शिला नारीं रूपमापेदे तर्हि मम नौका प्रस्तरशिलातो न कठिनास्ति ! अतो यदि पारं गन्तुमभिलषसि तर्हि पाद प्रक्षालनानुमतिं देहि ।

तदुक्त्वा— "सुन केवट के बैन, प्रेम लपेटे अटपटे
बिहँसे करुणा मैं, चितै जानकी लषण तन'

अर्थात् श्री रामचन्द्र भद्रः केवट वार्ता श्रुत्वा कर्मविचार सीता लक्ष्मणरूपै तौ लक्ष्मीशेषापश्यत्–यदर्च्यंताम् मम चरणं जिघृक्षुः स एव कूर्मोऽधुना कैवर्तो जातः अधुनाऽपि मत्पाद रजसंप्रज्ञालयितुमिच्छति, किन्त्व- धुनाऽपि निवारयितुमिच्छं कैवर्ताय सानुकम्पं श्रीरामं दृष्ट्वा द्वौव सलज्जौ अजायताम् । सोऽपि राघवानुमत्या तच्चरणौ प्रक्षाल्य शिरसा धार्याय सपरिवारः पादप्रक्षालन सलिले मूर्ध्नयाधायां कृतकृत्योऽभवत् । लक्ष्मीरिव कैवर्तोऽपि पादसेवाकरणे आदर्शत्वं गृह्यते ।

भक्त्या पंचमसोपानमर्चनम् । अर्चने साधकः आह्वान ध्यान पाद्यार्घ्या- चमन गन्धपुष्पादिभिः षोड़शोपचारैः प्रतिमा माध्यमेन भगवन्तमर्चति । इत्थमदीर्घकालं भगवदर्चनया भगवत्स्वरूपताम् इति ।

वन्दनं भक्त्या षष्ठं सोपानमस्ति । वन्दन भक्तौ उद्धवस्यादर्शः स्वीक्रियते । दास्य भक्तौ हनुमानुदाह्रियते । लङ्का विध्वंसे रावणविद्रावणे सीतायाः प्रत्यानयने शक्तोऽपि मारुतिः नतथा चकार, यतो श्रीरामचन्द्रेण रावणं निहत्य सीता प्रत्यावर्तनं क्रियते तदा सर्वपुंसां कीर्ति स्थापयिष्यति ।

सख्य भक्तौऽर्जुनस्य नाम सादरेण गृह्यते । अर्जुनस्य सखित्व भावनार्जितः कृष्णः तस्य सारथ्यभावं गतः ।

आत्मनिवेदनं भक्त्या नवमोऽङ्गः । सगुरुणा वारितोऽपि महामनस्वी बलि त्रीणि वसुन्धरापदानि याचते वामनाय सर्वस्वं समर्पितम् । यदाश्रितं जीवनमपि भगवते निवेदितम् । ततो तद्भक्त्या विष्णाना पाताल तले राज्यं तस्मै अदत्तम् । इत्थं भक्त्यानवाङ्गानि स्वप्रवचन विषयीकृतामिति ।

***

चश्माशाही विहरणम्

अगस्तमासस्य तृतीय तारिकायां चश्माशाही दिदृक्षाऽवर्धत् । ततो बस-अयने गत्वा चश्माशाही जिगमिषन्तं बसमारूह्य चत्वारिंशत्पण्यलभ्यं शुल्कचिट्टिकां हस्तयित्वा बसमार्गानुलग्न डलह्रदं अवलोकयन् मार्गमुभयत चीनारतरूपंक्तीना मनोज्ञानि दृश्यानि लोचनाभ्यामपूर्वमानन्दं व्यतरन् । बसस्टेशने बसादवतीर्य राजमार्ग दक्षिणदिशि मीलद्वयं पर्वतीयारोहण-मारुहन् सोपानानि समाक्रम्यात्युच्चं चश्माशाही द्वारं समाविश्योच्छ्वसितोऽभवम् अतः द्वार एकत स्थित्वा विश्राम्याग्रे प्राचलम तदग्रे कानिचित सोपानानि समारुह्य सघनछायवृक्षतलोपनिषण्णान् खादतः पिबेतः फलान्यास्वादितः नरनारीयूथान् दृष्ट्वा व्यचिन्तयम् किमद्यात्र कश्चित्समारोहो वर्तते, तदैवेकः सैनिकः मां गृहीत्वैकतः वृक्षतले समास्थायावदत् भो ! रविवासरीयावकाशकारणादद्य जनाः आगतवन्ता । ततः क्षणे विश्रम्य चश्माशाही नाम्नाविख्यातमुपरितो आच्छादित नीच्चैः कक्ष्यायां जनसम्मर्दयुतं लोहप्रणालिकांभिरुत्सर्जित जलग्रहणे जना प्रावर्तन्त । पंक्तयामग्रोऽहमपिवार-क्रम प्रतीक्षन् किञ्चिदग्रे प्रायाम् जलपात्रं पूरयित्वा स्वसाथि पार्श्वं आगच्छम् । जलपीत्वा, सेवतीफलानि संस्कृत्य स्वसाथंये भाग दत्त्वा तदास्वदम् । सैनिकेनोक्तं अहमपि उत्तरप्रदेशीयः आगरानिवासी अस्मि । अष्टनववर्षेभ्य काश्मीर मण्डलएव धर्मे नियुक्तोऽस्मि । मया प्रदेशोऽयं पदभ्यां प्रमापितोऽस्ति । शेख अब्दुला महोदयेन यः मन्धिकृतस्तत्र जम्बूप्रदेशः पञ्चापप्रदेशे विलयं गमिष्यति । तथा च वस्तुनामर्घं सामञ्जस्यमन्यप्रदेशैः सहास्मि देशेऽपि भविता । अत्रत्य सैनिक शिविरमतिदृढं विस्तृतं महच्छक्ति-युक्तं यतोऽत्र पाकचीनाफगानानां सीमा मिलन्ति । कदाचिदपि कस्यचिदपि शत्रोः दुष्कृत्यस्योतरं दातुं सेना सुमज्जा वर्तते, इत्यादि नैतिक तथ्यानि मह्यं निर्दिदेश । पर्वतकट्यां स्रोतः स्थूलं महता प्रयासेन तदात्यनृपतिभिः

पर्वतमुत्खाय विस्तीर्णं कृतमासीत् – इति तद्दर्शनेन सम्भाव्यते अत्राऽपि शालामार निशातोद्यानमिव पर्वतप्रान्तमुत्खायान्योद्यान कर्तुं शक्यते । तत्र च कतिपयफलभार नमितानि सेवती-अक्षोट वृक्षाणि शोभन्ते । स्रोतः स्थलाद् दूर पर्यन्तं विस्तृत डलझीलस्य दृश्यमत्याकर्षकं—पर्वतपादलग्न मार्गेषु धावन्तोवसा बालक्रीडकानीव ज्ञायन्ते । तत्रैव पश्चिमां सन्ध्यामुपास्य षड्वादनावसरे ततोऽवरूह्य पद्भ्यामेव प्राचलम्, श्री अमरनाथयात्रा-यामात्मनो जङ्घा सामर्थ्यं ज्ञातुमिति । मीलद्वयं पर्वतीयावरोहणादवतीर्य बसमार्गे समागत् चत्वारिंशत्पणोपलभ्यं मौक्तिकैरिवानुगुम्फितं मक्कीभुट्टमादाय जलं पीत्वा ततोऽप्रासरम् । मीलमित मार्गमुल्लङ्घ्य राजमार्गमेकतो घनच्छाय वृक्षतले समाश्वस्य मक्कीभुट्टं खादित्वा प्राचलम् । ततो तर्कित पथादवरूह्य द्वौ युवानौ मामन्वसरताम् । कियद्दूरं मया सह चलित्वा मामपृच्छन् कोऽसि ? कुतः आयातः ? क्व स्थीयते ? त्वं कञ्चिदपि रोग-मपाकर्तुं औषधं जानासि ? हस्तरेखावलोकन क्रियते ? यतो भवादृशाः गुणिन एवं पर्यटनाय प्रसरन्ति अथवा धनाढ्याजनाः । अतो यदि गुणरहितोऽस्ति तर्हि त्वत्पार्श्वेऽवश्यमेव प्रभूत द्रव्यं भवितव्यम् । द्वयोरीदृश पिपृच्छयाऽहं सतर्कौ तौ द्वौ धूर्तौ मां प्रतारयितुंमिच्छतः इत्यजानाम् । इतः एकः भव्यं मन्दिरं विद्यतेऽवश्यमेत्र त्वयावलोकितव्यमित्यादि वचांसि श्रावं श्रावं त्वरित गत्या प्राचलम्–कियद्दूरे द्वौ रक्षिणौ डलझीलस्य द्वारसेतौ स्थितावास्ताम्–तौ दृष्ट्वा तयोः पदानि शिथिलतयान्यभवन्नहमपि रक्षिपार्श्वे पञ्चमिनट पर्यन्तं स्थित्वाऽग्रे प्राचलम् । अतीव श्रान्तः तृषितः सार्धषट्वादनावसरे कस्यां चिद्यात्रा कम्पन्यां जलमादायपिबम् । नववादनावसरे स्वोपवेशने समागच्छम्. घटिकायन्त्रमुद्घाट्यास्तृते आस्तरणे लम्बितोऽभवम् । तत आश्वस्य जलंपीत्वा दुग्धचूर्ण घोलं कृत्वाऽपिबम् अस्वपम् ।

अद्यचतुर्थं तारिकायां प्रातः कालादेव मेघोऽवर्षत् । हनुमानमन्दिरे नमस्कृत्य ओम्प्रकाश तम्बाकू विक्रेतुः पार्श्वेऽगच्छम् । मद्रुच्यानुसारमसौ दीनानाथस्य विपणिकां मामुत्सृज्य न्यवर्तत् । दीनानाथोऽपि ससम्भ्रममुत्थाय मां गद्यां न्यवेशयत् । कुशलक्षेमानन्तरं ससम्मानं दिल्लीतः स्वपितरौ समायातौ । मातुरायुरिदानीमशीति वर्षाणि सन्ति । अधुना तन्नेत्रयो श्वेत कृष्ण बिन्दू सञ्जाते आङ्गलीयचिकित्सा विशेषज्ञः कथयति यत् साऽतिक्षीणा कृशास्ति, तत्कृतनेत्रोत्पाटनपीड़ा असह्या भवित्री । अतः कियत्कालपूर्वं तस्या बलवर्धनाय पौष्टिकोपचारैः चिकित्सित्वा पश्चात् नेत्रे संस्करिष्यामि । निज्यां मातरं तत्कृते चिन्तातुरं तं दृष्ट्वाऽतीवोद्विग्नोऽस्मि । सर्वसुख-सुविधायापूर्णायामपि जनः केनचिद्दुखेन पीड़ित भवति "नानक दुखिया सब संसार" । ततश्च निकटवर्ति विपण्यां मां नीत्वा चायमपाययत् । ततो वातादविक्रेतु जगदीश पार्श्वेऽगच्छम् । तत्र सन्तराम स्थित आसीनः तेन पृष्ठं यद्ह्यस्तने पद्भ्यामेव चलन्तं भावन्तमपश्यम् किमेतत् अमरनाथ-यात्रायै अभ्यासम् । स्वल्पं स्वल्पं नित्यप्रति चलनेन जंघे बलवती भविष्यतः । श्रुत्वैतत्सुस्मितः सुसमीचनमित्युवाच । स्वोपवनस्थाने समागत्य सायन्तन नववादनावसरे बाह्यकक्ष्यायं काष्ठीय लम्बासने स्थित आसन् । त्रिचतुरः साधवा तत्र घन-कालो-जटाजूटश्च महात्मा चरसं पीत्वा रक्तनयनः कामरोग ग्रस्तश्च । तत्रेत्थं संवादः प्रचलितः, यत्पुराकाले महाराजः प्रतापसिंहः दानवीरो धर्मात्मा चासीत् । असौ अमरनाथयात्रावसरे ऊर्णवस्त्रणि कम्बलानि साधुविप्रेभ्यो वितरति स्म । यात्रिणो यथाभिमतं राज्ञः प्राप्य कृतकृत्या अभवन् ।

महाराजा हरिसिंहस्तु नासीत्तदौरसः पुत्रः, अपितु तद्बन्धुपुत्रः स इङ्गलैण्डं गत्वा कदाचित् विदेश सुन्दर्या विवाहं कृत्वा तया सह प्रत्यागतः । तेनोद्विग्नः महाराजाप्रताप सिंहः मन्त्रिभि गुप्तपरामृशत् । एकदा इग्गलैण्ड

सुन्दरीं सादरमामन्त्र्य आह्वयामास । तदागतायां महाराजेनोक्तं यत्त्वया हरिसिंहेन विवाहः कृतः तत्पणबन्ध पत्रं द्रष्टुमिच्छामि । तया च हस्त-गुटिकातः तत्पत्रं निष्कासितं यस्मिल्लिखितमासीत यत् तस्या पुत्रो राजसिंहासन-स्योत्तराधिकारी भविष्यति इति । तन्मन्त्रिणोक्तं मह्यं दर्शय पणबन्धपत्रं तदुक्त्यानुसारं सर्वं तस्मै समर्पित करिष्यामि, दर्शनकाले तद्कर्गलपत्रं तन्मंत्रिणा स्वमुखे निक्षिप्तः निगीर्णश्च ।

श्री जवाहरलाल नेहरू एकदा रावलपिण्डीतः काश्मीर-प्रवेशाय सीमासेतुमुपगतः तदा महाराजहरिसिंहः स्वयं तत्र गत्वा तं न्यरुणत्, तन्निदेशोलङ्घने सति स तन्निगड़यितुमादिदेश । निगृहीतं तञ्च अभियोगं समकालयम् ।

तदैव स्वातन्त्र्योपालम्भन समये काश्मीरे पाकिस्तानो दस्युवेशं समाच्छाद्य काश्मीरम्प्रत्याक्रमत । मुज़फ़राबादञ्च लुलण्ठुः अतर्किताक्रमणं निरीक्ष्य महाराजो हरिसिंहः भारत सर्वकारं सहायतार्थमनुरूरोध । सरदार पटेल, जवाहरलालनेहरू आदि नेतारः समस्याया गम्भीरतां ज्ञात्वा भारतीय-सेनां काश्मीर रक्षायै न्ययुजन् । स्वसीमानं रक्षितुं कृतसंकल्पा सैनिका उड़ी मुज़फ़राबादे पाकयोद्धाणां श्रृंगङ्गमकुर्वन् । अग्रे च वर्धन्ती भारतीया सेना, श्री माउंटबैटनेन (अन्तिमो आङ्गल गवर्नरः भारतवर्षे) मध्यस्थ रूपेण अवरोधित, यत् या सेना यद्भूखण्डमधिकृतवती सा तत्रैव तिष्ठतु । इत्थं काश्मीरस्य भागद्वयं जातम् । एकञ्च पाकहस्ते गतं । किन्तु काश्मीर-मुख्य भागो भारताधिकारे तिष्ठति । तदैव भारतीय नेतृभि युवराज काश्मीरस्य मुख्यमन्त्री कृतः । महाराजा हरिसिंहोऽपि तदा मोहमय्या (मुंबई) मध्यतिष्ठत् भारतीय नेतृभिराकारिनोऽपि महाराजा काश्मीरे नागच्छत् । इत्थं नववादनावसरे निशीथे आगम्य स्वास्तरणेऽशयम् ।

अगस्तस्य पञ्चम्यां समुत्थाय कृतनित्यक्रियः भोजनाय आमंत्रितो यथेष्टं भुक्त्वा द्विवादनावसरे मीराकदलस्थित हनुमान मन्दिरं गतः प्रणम्य तत्रैव स्फटिक कुट्टिमं एव श्रमातपापनोदं कृत्वा त्रिवादने मन्दिरलग्ने तटबन्धेऽवतीर्य शिरः स्नानं चिकीर्षुर्वस्त्राण्यवसुच्य तट सोपाने स्थित्वा शिरः प्रक्षालयन्नासम् तदा मम कांकदृष्टिः वस्त्रेष्वेव लग्नाऽऽसीत् । तदा द्वौ युवानौ तटस्थापित वस्त्रेषु निमग्न दृष्टि अभूताम् । तदंचन्य एको युवा मां वार्तालापेषु लग्नमकरोत्तथापि मम दृष्टिर्वस्त्रेभ्यो न व्यचलत् । क्षिप्रं स्नात्वा शिरः प्रक्षाल्य नद्या बहिरागच्छम्, तौ सतर्कं मां मत्वा ततोऽपसृतौ । अहमपि समागत्य वस्त्रनिहित द्रव्यमस्पृशम् तत्तुपूर्ववेदासीत् । एतेन सन्तुष्ट. पुनरुपरि मन्दिरमागतः पश्चिमां सन्ध्यामुपास्य तदेव मनसि व्यचिन्तयम् यदत्र आकृत्या सरला अपि काश्मीरयुवानः लुण्ठन प्रहरणादि कार्येषु दक्षाः सन्ति । ततः स्वोपवेशनं समागत्त गोपनन्द गिरिणा चायपानं कारितः । प्रभुं संस्मृत्य संस्मृत्य रात्रौ नववादनवेलायामत्र पञ्चषो महात्मानो सम्भूयमिथो वार्तालापं चक्रुः तत्रैवेकतो निषण्णोऽश्रृण्वन् यन्महाराजा प्रतापसिंहो धर्मात्मा साधुसेवी दीनप्रतिपालकः आसीत् । तेनैव सनातन धर्मावलम्बि जनैः प्रार्थितः कस्यचिन्महात्मनः पार्श्वगतः तञ्चोक्तवान तेभ्यः सनातनधर्मभवननिर्माणाय स्थानं देयम् । राजा विस्तृत भूखण्डं सनातन-धर्मप्रासाद निर्माणायादात्, बहु द्रव्यञ्चादात् । तत्रैवाधुना प्रताप सनातन धर्मशाला निर्मापिता । यत्र निवासाय प्रत्येकस्माद् यात्रिणा शुल्कत्वेन रूप्यकमेकं दैनिके देयं भवति ।

धर्मशालायां दिशतोत्तरसंख्यकानि कोष्ठकानि विद्यन्ते । इत्थमसौ महाराजा श्रीअमरनाथयात्रिभ्यो कम्बलानि विविध यात्रासाधनानि वितरति स्म । एकदा कौश्चिद्गुर्जरैः समागत्य महाराजो निवेदितो यद्वयं हिमगुहायां रात्रौ घण्टानादा गीयमानस्तोत्र ध्वनिञ्च श्रृणुमः, एतत्प्रत्याय भवानस्माभिः

सह गच्छतु । तद्विस्मयोत्पादकवचनानि निशम्म महाराजा पालक्यां स्थितः विकट हिममार्गमतिक्रम्य तां हिमगुहायां गतः तत्र च लघुहिमलिङ्गैः समावृतं एकं महल्लिङ्गं तत्पार्श्ववर्ति च द्वितीयं कनिष्ठलिङ्गं दृष्ट्वा शिवपार्वत्या हिममयीमूर्ति दृष्ट्वा ननाम श्रद्धया । तदारभ्य तद्‌गुहागमनं मार्गं कारयितुं निश्चिकाय ततो निवृत्ता, तथैवाचरितम् । ततः पुरः विरला साधवो तत यात्रायै यान्ति स्म । परन्तु महाराजेन निर्मापिते मार्गे महतीयात्रा-प्राचलत् यात्रायां यदि हिमपातो भवति तदातु मरणनाथो भवति । बहवो यात्रिणः म्रियन्ते अन्यथा तु अमरनाथ यात्रा अमरत्वाय भवति । गत-प्रथमयामायां रात्र्यामहमपि निकटवर्ति स्वास्तरणे सुष्वाप ।

अगस्तस्य षष्ठ्यां पूर्ववत् सर्वदैहिककृत्यं सम्पाद्य श्रीनगरं अवलोक-यितुमितस्ततो बभ्राम । अत्रस्या राजमार्गा विस्तीर्णा शृंगतिटका अति विस्तृता तेषु च वाहन यातायाते रक्षिभिः समुचित व्यवस्था क्रियते । वाहनानामतिशय सम्मर्देऽपि दुर्घटना नगण्या भवन्ति । राजमार्गाणां सव्यापसव्ये योः पदपथाः निर्मापिताः सन्ति, किन्तु पदपथानां प्रस्तराणि यत्र भ्रष्टानि तन्नवीकरणेन कापि व्यवस्थाऽस्ति । राज्ञां समये निर्मापिता पन्थानः प्रतीयन्ते । राजप्रासादाः अधुना राजकीयसमा कार्यालयेषु परि-वर्तिता जाताः । बहुशः चत्वरेषु अनेके हट्टशाला मार्गा प्रवर्तन्ते । मुग़ल-हिन्दू-राज्ञां विभिन्न समयेषु नगरस्य श्रीवृद्धयै भूरिशां प्रयतितमिति । तद्राजमार्गाणां सुव्यवस्थया सम्यग्ज्ञायते । मध्ये च पन्थागत्य प्रवहन्ति पुण्यसलिला वितस्ता नगरमुभय भागयो विभजति । तदुपरि तरन्त्यो लघुतर्यो हंसा इव ज्ञायन्ते । उभयकूलेषु निषण्णा वृहन्नौका नर्तन" कुर्वन्त्या इव दर्शकान् मोहयन्ति । नगरभागद्वयं योजयितुमस्यां बहवः सेतवो पदपथे सम्भिन्नाः सन्ति । द्वयोस्तटयो महोच्च शिखराणि मन्दिराणि मस्जिदानि च सन्ति । अत्र हिन्दूमस्लिमयो मध्येऽन्तरं नगण्यमस्ति । यस्यां पण्यवीथि-

शालायां कोऽपि यायात्तत्र लम्बमानोत्कृत चर्मणामजशवानां दर्शनम् भवत्येव श्रूयते यदत्र नार्योऽपि सामिष भोजनं कुर्वन्ति । विशेषत. मत्स्यांशनमत्र पण्डितेष्वपि इति प्रसिद्धम । इहत्यो नरनार्योः स्फूर्तियुक्ताः गौरा स्वङ्गाः पद्माक्षाः समुन्नसाः सतर्का, शुकदृष्टयः सन्ति, केचित्केचित्सौजन्य सम्पन्ना अपि सन्ति । ते च कियत्पदानि सार्धं गत्वा मार्गदर्शनङ्कुर्वन्ति । इतस्ततः सर्वत्र विदेशिनो युवानो युवतयश्च उदद्बद्ध पृष्ठझोलकाः प्रसन्नवदनाः भ्रमण कुर्वन्त्याहृश्यन्ते । राजमार्गे पदपथेषु तिब्बत युवत्यः विक्रेपवस्त्राणि चित्राणि, हस्तसीवित लघुशिशुवसनानि, ऊर्णवस्त्राणि प्रसार्य तिष्ठन्ति, विक्रीणन्ति च तानि वस्त्रादिकोपरणनि, पर्वतीया पुरुषाऽपि विपणन्ति द्रव्याणि । तथापि राजमार्गेषु पदपथेषु सम्मर्दो न भवति । इत्थं सायंतनीय-सन्ध्यां कृत्वा भुक्त्वा स्वोपवेशनं समागत्य स्वपम् ।

***

लद्दाखवासिनः

अगस्त सप्तम्या तारिकायां पूर्ववत्कृत पौर्वाह्णिकः तम्बाकू विक्रेतु ओम्प्रकाश विपणिकायामगच्छम् । तत्र लद्दाखस्य व्यरहरिणः समागच्छन् । ते च रक्तगौरवर्णाः सुगठितशरीरा मधुराकृतयः, सौम्यगम्भीरप्रकृतयः शिरसि वर्तुलटोपिकां लम्बचोलिकावृत सिलवारं दधाना काश्मीरभाषाभाषिण आसन् । ते च व्यवहारकुशला स्वल्पशिक्षिता अपि सत्यभाषणं अधिकम्मन्यमाना मधुरभाषिणः, उर्दू भाषया वार्तामकर्वन् ।

त्रिचतुरामिलित्वैवात्र विपणापणं कर्तुं समागताभवन् । तैश्चओम्प्रकाश सुतात् (सुधीरात्) तम्बाकोः क्रयणं कृतं–तेषाञ्च पञ्चवादनावसरे एव प्रतिनिवर्तनं नियतमासीद्, अतस्तेस्त्वरिततया गमनागमनं विदधन्तोऽदृश्यन्त । तेष्वेकः हाजी नाम्ना प्रसिद्ध आसीत् तस्य विक्रीत तम्बाकु मूल्यपत्रे द्वादशमुद्राणां भ्रमः प्रमादातू सञ्जातः । ततः सुधीर उक्तवान्–भो ! स्वबिलमवलोक्य, हाजिनाऽपि सरलतया चोलकगुटिकातः निष्कासितं तद्बिलं तस्मै प्रत्यार्पितं तत्पठित्वा विचार्य च द्वादश मुद्राणां भ्रमं त्यजिज्ञिपत्–तत मम्यग्वधार्यऽस्मैं द्वादशमुद्राः स्मयमानोऽर्पयत् । परिपृच्छया तेनोक्तं यद्वयमितो वसेन द्रव्याणि नीत्वा कर्गलनगरं गच्छामः, पुनस्तत खच्चरेपूद्वह्य पद्भ्यामेव लद्दाखं गच्छामः । मार्गे मीलेऽर्धमीले च पाकिस्तान सीमाऽस्ति । विक्रीते द्रव्ये पुनरागच्छामो । तदनन्तरं ओम्प्रकाशेनोक्तं–यदयं हाजी न्यूनतोन्यूनं लक्षणामधिपतिरस्ति, किन्तु तद्दर्शनेन तु ज्ञायते यदयं साधारणो मनुष्यः । सामान्यवेषे सरलमूर्तिरसौ हाजी श्रीनगरनिवासीव ज्ञातोऽभवत । अहमपि द्वे पोस्टदले गृहीत्वा सहारनपुरामृतसरयोरलिखम् पत्र द्वयं च मोरकदलचत्वरे टैक्सीनामपृष्ठभागे बृहतिपत्रपेटकेऽपातयम्, अन्य भागे पार्सल पार्त न भवति । ततो निवृत्त कृतसंध्याक्रिया स्वासनमास्तीर्यऽस्वयम् ।

श्रीचन्द्रस्य स्थानावलोकनम्

अथ अगस्तमासस्याष्टम्यां महात्मनो श्रीचन्द्रस्य स्थानं दृष्टुं गतः। तत्स्थानं लालचौकात् मीलमिते दूरे पूर्वदिशि वर्तते। विशालस्थानस्य क्षेत्रमति विस्तृतं द्वयोर्भागयो विभक्तः। एकतः काष्ठमयं द्वितलं, अन्यतः सपृष्टिसोपानान्यारूह्य विशालाजिरम्चानेक-कक्षासु विभक्तं, मध्ये एकं नारवृक्ष गगनतलं चुम्बति तमभितवज्रलेय निर्मितं स्थण्डिलमस्ति। तदेकनः एकस्मिन्मन्दिरे महात्मनः श्रीचन्द्रस्य शैली प्रतिमाऽस्ति। तच्च चित्रकारस्यापि प्रतिभा राजते। सहैव शिवलिङ्गमपि स्थापितमस्ति।

अगस्तनवमतारिकायां सर्वं पूर्ववन्निवृर्त्य नगरावलोकनाय अमीरकदलात् पश्चिमे एक विशालराजमार्गे स्वयामतः पदपथे प्राचलम्। दूरदूरां प्रसृतां हट्टशालमतिक्रम्य मार्गतरुपंक्तीनां छायासु प्रचलन् लद्दाख क्षेत्रनिवासि नरनारिभिः पदपथ स्थण्डिलेषु विक्रेयवस्तूनि-ऊर्णवस्त्राणि च प्रसारितान्यासन्। तेषां शिशवः वस्त्राणि आकृष्य प्रधावन्ति स्म-ताननुधावन्तो हसन्तश्च तानगृहमन् तद् हस्ताद् वस्त्राणि आदाय पुनः प्रसारयन्ति स्म, किन्तु न तान् अतर्जयन्। लद्दाखीय स्त्रीपुरुषा गौरा, विशालमाला, लम्बकेशा, आतपीय निदाघेरपत्यपि ऊर्णवस्त्राणि आच्छाद्य भ्रमन्ति स्म। तेश्बौद्धधर्मावलम्बी आसन्। पश्चिमेवय स्थितेष्वपि तेषु वार्धम्याचिह्नानि न प्रतीयन्ते। आग्रेगच्छनुभयतः विस्तीर्णं प्रमादपंक्तीं चीनारनरूश्रेणीश्चावलेकयन् मील मील दूरे प्रायाम्। राजपथस्य वामत. एकस्य भिखस्य पण्यशालन्निरीक्ष्यश्रांतस्तत्रैवातिष्ठम्। तिष्ठं अपृच्छम्-भो एषराजमार्गो कुतो याति; हसन्नसावकथय—पाकिस्तान सीमानं स्पृशति। यदि रोचते तर्हि न त्याज्योऽयं मार्गः पाकिस्ताने त्वां नेष्यति। हास्यरसिकं मत्वा तत्पार्श्वे वृस्यां न्यषीदम्। ममाभिजनं देशं जन्मभूमि ज्ञात्वा रावलपिण्डी निवासो असौ पाकिस्तान निर्माण कथामकथयत्।

इतः कश्चिन्मन्दिरं दर्शनयोग्यमस्ति न वा तदा अंगुल्या निर्दिशन्यदभिमुखे मध्ये राजमार्गमतिक्रम्य उत्तरदिशि विशाल मार्गो दृश्यते, त अस्ति एक मन्दिरं द्वारे च मन्दिर नामपट्टं दूराहृश्यते । ते निर्दिशत पथा तन्मन्दिरेऽगच्छम् । मार्गलग्नलौहकपाटाभ्यन्तरे घूर्णमानो लौहचक्रमतिक्रम्य मन्दिरे प्रविष्टः तत्र लिखितमासीत् श्री तुष्करराज भैरव मन्दिरम् । तदेकतः एकस्मिन् मन्दिरे महात्मनः श्रीचन्द्रस्य शैली प्रतिमाऽस्ति तत्र चित्रलिखिताऽपि प्रतिमा राजते, सहैव शिवलिङ्गमपि स्थापितमस्ति । तिसृकक्षासु विभक्तमपि, एकस्यो प्रविश्य तत्संलग्न सर्वासु कक्षासु प्रवेष्टुं शक्यते । तत्पूजास्थलानि नमस्कृत्य बहिरागत्य आच्छादित वेदिकायामेकं युवकसाधुमपश्य तं नत्वा तत्पार्श्वे एवोपाविशम् । बहुधा पृष्टोऽपि अंगुलिसंकेतनादिदेश यदसौ सम्मुखे काष्ठपीठे महन्तस्तिष्ठति तं गत्वा पृच्छ तत्र जिज्ञासामसावेव शमयिष्यति । तेन दर्शितदिशाहस्तेन स्वलघुझोलकमाकोलयस्तत्पार्श्वे समगच्छम् असावपि मां तत्काष्ठ एव आसितुं शिरसा कम्पेन अदर्शयत् । सम्मुखासीन चिनारवृक्षसम्बन्धेऽपृच्छम् । तदुत्तरेऽब्रवीत् यदेकदा काश्मीर मुसल्मानानां राज्ये मुस्लिमाना हिन्दून मोहम्मद धर्मे दीक्षितुम्प्रावर्तयन् । हिन्दवश्च सम्भूय तदा च मुस्लमान शासकाय न्यवेदयन् । यदि महात्माश्रीचन्द्रो मुसल्मानो भवेत्तर्हि वयं सर्वे मुसल्मानाः भविष्यामः । तच्छ्रुत्वा बटशाहो बादशाहः श्रीचन्द्रं मुस्लिम धर्मे प्रवर्तयितुञ्जगाम । तदागमनकाले श्रीचन्द्रेण साधनाऽग्नि पुञ्जादुल्कां समादाय बादशाहञ्च दर्शयन्तेवऽग्नेरेकत आरोपयत् । आरोपण समकालमेव मोल्क हरितशाखाऽभवत् । तच्चमत्कार दर्शन समकालमेव तस्य हृदयं परिवर्तितमभूत, लुण्ठितोऽसौ हिन्दूनां गुरू चमत्कारिणं ज्ञात्वा नतमस्तकः क्षमां ययाचे । महात्मा तु तूष्णीं स्थित एवासीत् । बादशाहोऽपि स्वापराध क्षमापनाय तस्मैगुरूवे इतस्ततः महद्वनमासीत्, तन्महात्मनेऽर्पितम् । यथायथा नगराभिवृद्धिरवर्द्धत्, तथातथा तद्वनं निवासाय जनैररुध्यत् ।

ग्रधुनापि उदासीन सम्प्रदाय साधूनां नियासाय महत्स्थलं विद्यते । तद् दृष्ट्वा वर्तमानमहन्तं समापृच्छ स्वोपवेशनं जगाम । यद्यपि रात्रौ मम निवास कक्षातोबहिः कक्ष्यायां साधुना संघट्टो विविध देशदेशान्तर कथासु प्रकृतस्तथा ग्रहं श्रान्तः ग्रस्वपम् ।

मन्दिरमार्गमुभयतः ग्रावरणक्षयानां वृत्याराजमानः मन्दिरगर्भकपाट-मुद्घाट्यन्तः प्रविश्य नमस्कारकर्वम् । बहिरागत्य एकतः शाद्वलाच्छन्ने स्थले स्थितस्तत्र द्वे नार्यौ तण्डुलान स्वच्छी कुरतः स्म । एको युवकोऽप्यासीत् । गौरः कृश शरीरोऽपि श्मश्रुलस्तदैवे कोऽन्यो युवा समायातोऽतिष्ठत् । मया पृष्टं यन्मन्दिरस्य पुजारि कुत्र वर्तते । द्वाभ्यां सहैवोक्तं वृद्धोऽस्मत्पिता तत्र स्वहर्म्ये तिष्ठति । यद्यमिलष्नते तर्हि तं ग्राकारयावः । नहि नहि भवतोः दर्शनेनैव ग्रभीष्टं पूरितम् । पश्चादागतो युवा पुलिस सेवायां नियुक्त ग्रासीत् । मन्दिर संल्लग्ना एका धर्मशालाऽस्ति तस्यां कन्याविद्यालयोऽस्ति । तद्भाटकात् मन्दिरस्य व्यय पूर्तिश्च सञ्जायते । सम्मुखीने क्षेत्रे यत्र बालका क्रीड़माना दृश्यन्ते । इत्य समाप्तायामेव वार्तायामहमुत्थितः प्राचलम् । ग्रातिथेयमहत्वानभिज्ञास्ते यतो जलपानायापि न पृष्टः किमन्यत । इत्थं प्रतीयते यत् ते ग्रतिथि धर्मशून्या सन्ति, परन्तु ग्राकाशपातालयोरन्तरमपि नाशयितुं क्षमाः सन्ति।

✿

श्रीशंकराचार्यमन्दिर दर्शनम्

अगस्तस्य दशम्यां कृतपौरवाह्निका मध्याह्नोत्तर त्रिवादनावसरे श्रीशंकराचार्यं मन्दिरस्य दर्शनार्थंगतः। प्रथमंलाल शृङ्गाटके डलगेटस्य शुल्कचिटिकां गृहीत्वा वसमारूढ़ः डलगेटी अवतीर्यं स्वदक्षिणे भागे श्रीशंकराचार्य इति लिखितं पठित्वा तत्रैव जलं पीत्वा मोटरमार्गमवलम्ब्य प्रास्थितः दीर्घोऽयमारोहणमार्गं आसीत्।

शनैः सन्था शनैः पन्था शनैः पर्वतलङ्घनम्।
शनैः विद्या शनैः वित्तं शनैः पर्वत रोहणम्॥

अहमपि पर्वतारोहणावरोहणे त्वरान कार्या इति विचिन्त्य शनैः शनैः गच्छन् क्वचिद्विरम्य घनच्छाया वृक्षतले पुनः चलनाय बद्धपरिकरोऽचलमेव। षटवादनावसरे शंकराचार्यं मूलमुपगतस्तत्राऽन्येऽपि सैनिकाः सद्गृहस्था, युवानो, एकाकिनः मोटरसाईकले, मोटरकारेण, लघुबसेन यात्रामकुर्वन् पर्वतशिखरोपरि यात्वा प्रथमऽतिश्रान्तो तत्रैकस्मिन् बद्धमूल वृक्षतले न्यस्तशरीरः अभवम्। क्षणम् विश्रम्योत्थितः उपानहे एकतोऽवमुच्य, जलं पीत्वा मन्दिरपादमूले श्री आद्य जगद्गुरु शंकराचार्यस्य भव्यप्रतिमां दर्शं दर्शं चिरकालं तत्रैव स्थित्वा नमस्कृत्य, अत्युन्नता कतिपयः सोपानानामारोहणं कृत्वा ततो लोहद्वारमुल्लङ्घय पुनः शिवमन्दिरमाप्तुं कतिपय सोपानान्युल्लंधय विशालशिवलिङ्ग ददर्श, नमस्कारं कृत्वा ततोऽवरूह्य मध्यस्थण्डिले स्थित्वा अपठम्—

श्रीमत्पदाम्वुज रजश्चकमे तुलस्या
लब्ध्वाऽपि वक्षसि पदं किलभृत्यजुष्टम्।
यस्याः स्ववीक्षणकृतेऽन्य सुर प्रयासः
तद्वद्वयं च तवपाद रजः प्रपन्नाः॥

यत्पत्यपत्य सुहृदामनुवृत्तिरङ्ग
स्त्रीयां स्वधर्मं इति धर्मविदात्वयोक्तम् ।
अस्त्वेवमेतदुपदेशपदे त्वयीशे
प्रेष्ठोभवांस्तनुभृतां किलबन्धुरात्मा ॥

मैवं विभोर्हति भवस्तुगदितुं नृशंसम्
तन्त्यज्य सर्वविषयास्तवपादमूलम् ।
भक्ता भजस्व दुखग्रह मा त्यजास्मान्
देवो यथादि पुरुषो भजते मुमुक्षून ॥

एषां घोषनिवासिनामुतभवान किदेवरातेति नः
चेतो विश्व फलात्फल त्वदपरं कुत्राऽप्य यन्मुह्यति ।
सद्वेषादिवपूतनापि सकुला त्वामैव देवापिता
यद्धामार्थं सुहृत्प्रियात्म तनय प्राणाशयास्त्वत्कृते ॥

अथोऽपूर्वंदृश्यान्यपश्यम् । तत्रैवेकत: कतिपये सैनिकाः चित्राणि ग्रहीतुं फ़िल्मयन्त्राणि मन्दिरस्योच्चभित्तौ स्थितानकुर्वन् । अहमप्येकतः स्थित्वा डल हृदस्य दृश्यं हस्ततलगत चित्रमिवापश्यम् । अम्भोधिनावृताः सप्तद्वीपा इव ह्रदस्यमध्ये पर्वतकूटा अदृश्यन् । सर्वकाश्मीरं पिण्डीभूतमिवैक चित्रफलके दृष्टिगोचरमभूत् । कासरे स्थापिता मृण्-च्छिला इव श्रीनगर-प्रासादा ह्रदे तरन्त्यस्तर्या हंसा इव । काशस्तत्रकानीत्र तरुश्रेणयः ह्रदानु-लग्न राजमार्गे धावन्तो बसा मार्जारा इव चलन्तो मनुष्य क्रीड़मानीव प्रातीयन्त । चिरं श्रीनगरस्यशोभां निरीक्षन्नपि चक्षुषिनातृप्यताम् । सेवती-फलानि संस्कृत्यास्वदम् ।

द्वितीय तलादवतीर्यं वृक्षछायायां क्षणं विश्रम्य पुनः मन्दिरस्याधोभागे आद्यजगद्गुरु शंकराचार्यस्य भव्यप्रतिमां श्री बद्रीविशाले तप्तकुण्डे प्रतिष्ठि

पितामिव शिरसिप्रावृताञ्चलां पद्मपत्रेक्षणां अवहित चेतसा निरीक्ष्य कामप्यनिर्वचनीयां स्थितिमनुभूय प्रतिमाया अधस्तने शिल्पलेखमंकितम पठम्—

श्रीशंकरोविजयतेतराम्
श्रीकाश्मीराधीश्वर महाराजकर्णसिंहस्य तत्त्वावधाने
संचालित धर्मार्थं काऊन्सिल द्वारा एतच्छंकराचार्य
मन्दिरं श्रीशारदापीठाधीश्वर जगद्गुरु अभिनव
सच्चिदानन्दतीर्थं महाराजस्याज्ञया अहमदाबादीयेन
श्रीलक्ष्मीचन्द श्रेष्ठिना वैशाखशुक्ल पंचम्यां अष्टादशोत्तर
ऊनविंशे वैक्रमाब्दे संस्थापितेति ! शुभम्भूयात् ।

ततः पुनर्जलपानं कृत्वाऽवरोहणे कृतप्रयत्नः प्राचलम् । शिवमन्दिर संलग्नारोहणावरोहणं अतिशयने विषमं, यद्यपि धर्मार्थं ट्रस्ट द्वारा नव्यसोपानारोहणं निर्मीयमाणमस्ति । ततोऽवरुह्य स्पष्ट वाहन मार्गे समागतः । तत्र मया पृष्ठे कार्यलग्नै श्रमिकैः पदयात्रिणामवरोहणमार्गो निर्दिष्टः । तमेव जानुत्रोटकं मार्गमवलम्ब्य शनैः शनैः पाद क्रमगं कुर्वन् मार्गेद्वाभ्यां बिहारदेशीय युवाभ्यां सान्वितः प्रशस्तश्च यदेतादृश्याभवस्थायामपि यात्रोत्साह इति तथा च कथितं येन कश्मीरं न दृष्टं तस्य जीवनं निष्फलमस्ति इति तयोवाचं श्रृण्वन् अग्रे प्रचलत एव एतादृशो विकट मार्गो समायातः यं दृष्टवा प्रव्यथितः अत्युत्कट शिलामार्गमवरुरोध । यदि नीचैरवतरामि तर्हि पादस्खलनेन पतन भयम् यदि चोन्नतशिलां स्पृष्ट्वा गच्छेयम तर्हि हस्तस्खलनभयेन मशंकं मां दृष्ट्वा दम्पती प्रकाशमायाता चाब्रवीन्मार्ग च्युतोऽस्मि तथापि मा बिभेहि अस्यां शिलायामवहितेन पादो विधयो मम हस्तालम्बं गृहाण, इति मम हस्तं दार्ढेयन गृहीत्वा निःशङ्कमुपर्यागच्छं तदुक्तयानुसारं पादन्यासं कृत्वाऽभीष्टमार्गे प्रवृत्तो बहून्धन्य-

वादांन्ताभ्यां दत्त्वा सायन्तने षट्वादनावसरे विकटावरोहणं समाप्य राजमार्गं-माश्रितः येनकेन प्रकारेण पदक्रमं कुर्वन् एकं युवकं बसस्थितिः क्व वर्तते सोऽपि मां नीत्वा समवारा नामक चत्वेर परिमुच्य गतोऽहमपि तदुपकाराय तस्मै धन्यवादमुक्तवा नगरगामि बसप्रतीक्षया तत्रैवातिष्ठम् । एको बसः कांश्चिद्यात्रियोऽवतार्य यथाऽहं तत्रागच्छम् तर्हि मत्प्रापणात् पूर्वमेव धावितः तेन निराशास्तत्रैवातिष्ठम् । ततोऽन्येबसे आगमनकालमेव तमारुढः तस्योपचालकेन त्रिंशस्य पणानि गृहीत्वा बटमारास्टेशने समायातेऽव-रोहणाय प्रेरितः । एकः शून्योयानस्तत्रैव तिष्ठन् । ततोऽन्य पञ्चविंशति पणकानि दत्वा लालचौके अवरोहणायऽब्रुवम् । यथास्थानमवतीर्य स्वनिवे-शनञ्जगाम् । पश्चिमां सन्ध्यामतिकाठिन्येन उपासितवान स्वपञ्च ।

अथागस्तस्यैकादशतारिकायां आचरित पौर्वाह्निकेन श्रीनगरे बहुशः पर्यटमेवऽकारि । ओम्प्रकाश तम्बाकू विक्रेतुः विपण्यां अगच्छम् । सन्तराम दृष्ट्वैवात्युत्साहम् ससंभ्रञ्चोपासाञ्चक्रे । मां गृहीत्वा सन्तराममिधामिष्टान्न विक्रेतु विपण्यां गतवान् । सर्वे च तत्र चाय स्वादनलम्पटाः उत्थायैव चायचषकान्फूत्कृत्य पिबन्तः विविध मिष्टान्नाभ्युपभ्रञ्जमाना आसन् । किन्तु विपणिस्वामी सन्तरामं मां दृष्ट्वैव प्रभावित उत्थाय एकतः स्थित स्वासने मामुपावेशयत् । विना शुल्कं मधुरमयेन चायेन विविध मिष्टान्नानि परिवेष्य ममाग्रे सम्भिथापितवान् । दीनानाथेन बहुयत्न कृतेऽपि तेन चाय मूल्यं नाङ्गीकृतम् । तस्मै शुभाशिषो दत्वा स्वस्थाने सप्तवादनावसरे सायन्तने प्रत्यागच्छम् । पश्चिमञ्च मन्ध्यामुपास्य नववादनावसरे धर्मशालाया द्वारकक्ष्यायां यतिमण्डली पूर्ववत् अद्यापि कौतूहलपूर्णवार्तालापं चक्रे । अद्यतनीन विषया काश्मीर समस्यामालम्ब्य प्रवृत्तः । यत् पुरा अमेरिका शासकमण्डलस्य काश्मीर गृध्रदृष्टिरासीत, तदाऽमेरिकाया गुप्तचरनिभागः सामदामदण्डभेदै स्वपक्षावलम्बिनं चक्रुः । अमेरिकाया नीतिरासीत् यद्यनेकेन प्रकारेण काश्मीरे सैन्य शिखरस्य स्थापना भवेद् । काश्मीरे सैन्य शिखिर स्थापनेन सीमावर्ति पञ्चस्यैव देशेषु तेषां प्रभावः पतिष्यति, तेन तेषु कोऽपिदेशः तद्विरूद्धाचरणं नाचरिष्यते परन्तु तत्कालीन सतर्कप्रधामन्त्रिण श्रीजवाहरलाल नेहरुणा स्वकीय गुप्तचर विभागेन तद्रहस्यमवगतम्, ततः क्षिप्रमेवामेरिका पक्षपाती ऐषो निगृहीतस्तदा डॉ० कर्णसिंहः आसीत् सदर-ऐ-रियासत, तस्य नैपुण्येन तत्सर्वं सम्पन्नम् । बहुकालपर्यन्तञ्च भारतसर्वकारीय दृष्ट्यावरुद्धोऽधुना तेन बङ्गलादेशे भारतीयैक्यं शौर्यञ्च दृष्टम् । तेन चासौ सत्त्वसम्पन्नो जातः पुनश्च भारतसर्वकारेण कैश्चित्यपथबन्धैः पुनः शेखोमुख्यमंत्रित्वं पदे नियुक्तः । अद्यत्वे काश्मीरस्य सतावान, असौ अमरनाथ यात्रा प्रबन्धान कारयति, इत्यादि प्रचलिता यामेव वार्तायामहं, निद्राधीनः स्वास्तरणे सुप्तः ।

द्वादश तारिकायां मध्याह्निककृत्यः विधाय मध्याह्नोत्तर त्रिवादनावसरे हनुमानमन्दिरं जगाम । कृतप्रणाम मन्दिर परिक्रमायां, अनावृते कुट्टिमे देहं प्रसार्य स्थितस्तर्हि पित्राभ्रात्रा सह हरिबाबू स्वर्णकारः श्रीअमरनाथ स्वामिनो यात्राया प्रत्यागतः, अयं पूर्वं जम्बूधर्मशालाया मिलित आसीत्, अमरनाथं जिग्मिषवोऽस्माभि सहैव भवताऽपि गन्तव्य मिति । परं छड़ीदेवेन सह यात्रां करिष्यामीति श्रुत्वा ते त्वरया यात्रामकुर्वंन् । यदा ते सकुशला यात्रा कृत्वा प्रत्यागतस्तर्हि अतिशयेनोत्सुकोऽहं पुनःपुनः तमपृच्छम् । कथं यात्रा कठिना कच्चिद् वर्षाजन्य विघ्नस्तु न समपद्यत् । समवयस्कं तस्य पितरमपृच्छम् । यात्रायां जङ्घे तुन पीड़िते, भवन्तोधन्या ये यात्रां कृत्वा सकुशल निवृत्ता अपि । अहो मे प्रमादः कथं भवद्भिः सह न गतः । यदि भवद्भिः सह गतो भवेयम् तर्हि मम यात्रापि सम्पन्ना स्यादेव । इत्थं यात्रा विषयक बहुधा वार्ताभवत, ततो अन्योऽन्यं स्वनिवाससंकेतं दत्त्वा लिखित्वा च चिराय नियुक्ता अभवाम । अहमपि तन्मन्दिर एव पश्चिमा सन्ध्यामुपास्य स्वनिवेशे प्रत्याजगाम ।

अमरनाथ यात्रा

*

त्रयोदश तारिकायां मध्यान्हे प्रीतम मुनिना सह यात्रोपयोगि कानिचिद् वस्तूनि क्रयणायऽगच्छम् । प्रथमन्तु हिमचलनोपयुक्ते फ़ोमस्योपानहौ द्वादशभिर्मुद्राभिक्रीते, पुनः ऊर्णजङ्घावरणं दर्शभमुद्राभि गृहीतम् । तथान्यान्यपि यात्रोपयोगानि छुहारा द्राक्षाफलानि क्रीतानि । श्रीनगरस्थ धर्मट्रस्टस्य सदस्यै सह परिचयं कर्तुं गतवान तेषु द्वानेवमिलितौ ताभ्यामुक्तं यत् मार्गे विश्रामस्थलेषु निवासाय पटमण्डयस्य व्यवस्थां करिष्यावः, परन्तु यदि वयं विश्रामस्थलेषु विलम्बिनो यास्यावस्तर्हि भवद्भिः प्रतीक्षा करणीया भविष्यति । तदनन्तरं धर्म ट्रस्टस्य अध्यक्षं मिलनार्थमगच्छम् । मिलनावसरेऽसौ मामपृच्छत्कुत आयातोऽसि ? क्व गच्छसि ? किं ज्ञातीयोऽसि, किं गोत्रीयो, का शाखाऽस्ति ? अत्र क्व स्थितिः क्रियते ? अहमुदतरम्–सहारनपुरात्समायातोऽस्मि । अमरनाथयात्रायै रुचिरस्ति । सूदन ज्ञानीयोऽहं, शण्डिल्य गोत्रीयो, ब्राह्मणोऽहमस्मि, मान्ध्यंन्दिनी शाखाऽस्मि । अधुना च भाई मक्खनसिंह धर्मशालायां स्थितिं करोमि । यात्रा सौकर्याय भवत्सहायमभिलषामि श्रुत्वैसुस्मितोऽकथयत्–न चिन्ता करणीया सर्वव्यापी भगवान् श्रेयो विधास्यतीति । पुनश्च–किं भवता पण्डितहरिदत्तस्यामृतसर निवासिनामश्रुतम् । आमित्युक्तवन्तमपि महत्तो गौरवमुद्रयाऽब्रवीद्–यदहं तस्य भागिनेयोऽस्मि, असौ मम मातुल, इति । पञ्चनदीयोऽस्मि, त्वेनैव ममतां प्रदर्शयन्, निभृतोऽभवत् । पयः पानमपि कारितम् । भोजनायापि न्यमन्त्रीयत्, किन्तु पूर्वमेव कस्यचिन्महानुभावस्य गृहे निमन्त्रणम् स्वीकृतमासीत्, अतस्तत्रभोक्तुं वैवश्यं प्राकटयम् । इति तं समापृच्छ्य, स्वोपवेशने समागतः । परन्तस्य भगवावस्त्रेषु तेजस्वितां, स्फूर्तिमन्तां वार्धक्येऽपि चञ्चलतां वार्तालापे च

स्मितास्यतां, अहोऽस्य शरीरसौष्ठवतानाङ्माधुर्यम्, व्यवहारकौशलम्, चिन्तयन्नेव स्वोपवेशनमागतः सायन्तनीन कृत्यमाचर्य, प्रभुं स्मृत्वा निद्राङ्कं कृतचेतनां व्यश्रमम् ।

प्रभातायाञ्च शर्वर्यां आस्तरणे समुत्थाय षटपदीस्तोत्रेण प्रभुं स्मरन्नेवास्तरणात्समुत्थितः चतुर्दशतारिकायां कृतनित्यक्रियश्च सत्सङ्ग-मकरवम् ।

तुम्हारी सत्ता के बिना हे प्रभु मंगल मूल ।
पत्ता भी हिलता नहीं हिले न कोई फूल ।।

तदनन्तरं मार्गे प्रातराशादिकाय अर्धकिलोमितं चणकचूर्णं घृते पक्तवा तस्मिन्सार्धं द्विशतग्राममितां सितां वातादचूर्णञ्च सम्मिश्रय किलोमितं चूर्णञ्जातम्–पञ्चष दिवसावधि पर्याप्तं भविष्यति इति मनस्तोषोऽजायत ।

ततो गृहस्य परिवारस्य समाचार ज्ञानाय ओम्प्रकाश तम्बाकूवाला पार्श्वे किञ्चित्पत्रादिकं कुतश्चित् समागत न वा तर्हि तत्क्षणं पत्रे दो निष्कास्य मह्यमदात् । तयोरेकं कृष्णलालस्य, अन्यच्च सहारनपुरीयस्य । उभयत्र कुशलसमाचारं शिशूनाञ्च सुखित्वमवगत्य मन उत्फुल्लं जातम् । तत्रैव च उभयत्रैवोत्तरं लिखित्वा पत्रपेटके पत्रद्वयं पातितम् । सप्त-वादनावसरे स्वोपवेशने गत्वा सायन्तनीन कृत्यं सम्पाद्य स्वपम् । शयनोऽपि यात्राविषयक कल्पना प्रसङ्गान् चिन्तयन्नेव निद्रांगतः ।

⁀⁀*

अथ पञ्चदशागस्त तारिकायां ब्राह्मे मुहूर्ते समुत्थाय शौचादिना निर्वृत्य स्नात्वा ठाकुरजी पूजामनुष्ठाय शालग्रामासनं तत्रत्य पुजारि गोपानन्द गिरये प्रदाय पञ्चमुद्रिकां समर्प्य तस्मै अवधानतया शालग्रामस्य पूजा विधेया। प्रत्यागत्यापि यथाशक्ति सेवां करिष्यामि। प्रसन्नमुद्रया ठाकुरपूजनमङ्गीकृत्यावोचत यन्नात्र चिन्ता करणीया—भवन्तु कुशलिनं प्रत्यागत्य स्वशालग्रामं पुनर्गृहीत्वा कृतकृत्यो भविष्यसि। मा चिन्तयेति। ततः किञ्चिदूनदशवादने चानणलाल गृहेऽगच्छम्। तत्र भोजनमुद्यतमासीत्, फलानि चास्वाद्य उत्थिते मयि श्रीचानणलालो वर्षा-तपत्राम्वरं गृहीत्वा धर्मशालायां मया सह समायातः। वर्षातपत्रं मह्यमुपन्यस्य कृतचरणवन्दनो मम कुशलतां काम्यमानः प्रत्यगच्छत्। मुनि प्रीतमः श्रामिकं समाहूय तेन आस्तरणद्वयं समुत्थाप्य द्विचक्र मञ्जूषे न्यधापयत, तवानुगच्छन्—बस स्टेशनं समागतः। भारवाहकश्च तदास्तरण-द्वयंगृह्य भारञ्च नीचैर्निधाय रूप्यकद्वयं श्रमिकं गृहीत्वा ययौ। वयमपि जनसम्मर्दबहुले राजमार्गे पहलग्रामीय. बस प्रतीक्षायां तत्र स्थिताः किन्तु सार्धैकादश वादनावसरे बसे समागते च भारवाहकेन वस्तुभारं बसोपरि निधाप्य बसमारुढा पूर्वतो निर्धारित नवदशैकादश्च उपवेशनेषु निषण्णा अभवाम। पञ्चषमिनटानन्तरं वैष्णवसाधु बहुलो बसः श्रीनगराद् बहिर्मनोज्ञदृश्यानि पूर्वदृष्टानि पश्यन्तो मार्गे द्वित्रिग्रामानतिक्रम्य, अनन्तनाग नाम्नि नगरे समागताः। बसस्तत्र दशमिनटावधिकं स्थितः। नगरोऽयं अस्य क्षेत्रस्यान्यतमो ज़िलास्ति। अत्र नागानुकृत्या अनन्ता वितस्ताया जलप्रवाहा दृश्यतेऽस्मात्कारणादनन्त नाग संज्ञाऽस्य जातेति सम्भाव्यते। नद्या जल दुग्धमिव पवेत श्वेत विभाति।

द्वादशवादनावसरे तत्र बहवो नरनार्यः वस्त्राणि क्षालयन्ति स्नान्ति च स्म। स्थानस्य चलनवेलां निरीक्ष्य मनसि अज्ञातौत्सुक्यमजायत।

बसोऽस्पन्दत ! मार्गे च नद्या यत्र तत्र निष्कासिता राजवाह राजमार्ग-मनुलग्ना कुण्डलि इव प्रतीयन्ते । क्वचित्तेषु लघु सेतु बन्धाः सन्ति। पर्वत कट्यां प्रधावन् बसः नृत्यान्वारङ्गनानु इव सुशोभते स्म । तस्या-रोहणावरोहणे प्रधावेन यात्रिणा आन्दोलिता अभवन् । तथापि वायुवेगेन प्रसर्पन् मट्टन (मार्तण्ड) नाम्नि नगरे बसः स्थितोऽभवत् । बसारुढा इव वयं सम्यक् प्रकारेण कुण्डोपरिमन्दिराणि कुण्डेषु स्नानादिकं विदधतो जनान् अपश्यम् । कुण्ड निस्सृत जलमग्रे गत्वा नद्याममिलत् । तत्र च कलमकेदार क्षेत्राणि शस्य श्यामलानि विविधतरुश्रेणश्चाप्यशोभन्त । पञ्चमिनटं स्थित्वा बसोऽग्रेऽधावत । ततश्च एशाग्राम समायातो बसः तत्र च छड़ीयात्रा यात्रिणां उपनिवेशः अत्यधिकं रराज । क्वचित् पटकुटीरेषु केचिदनावृतायां भूमिशय्यामाश्रित्य, केच्चिदग्निं प्रज्वाल्य जयंकुर्वाणाः, केषाश्चिदासन समीपे त्रिशूला उत्खाता आसन्, केषाञ्चि-दासनेषु घण्टान्विता राजन्ते स्म । केचिद् गीत स्तुतिभिः परमात्म सेवायां लग्ना आसन् । अलख, हरि ॐ नादैराकाशं स्फोवयन्ति स्म । तेषाञ्च यात्रोन्मादं प्रतिभाति स्म ।

❖❖❖✻❖❖❖

पहिलग्राम विवरणं

ततो बसो किञ्चिदूनहोरायां पहिलग्रामे समागतः । राजमार्गे तटयो राजकीय कार्यालय भवनानि, पर्यंटक निवासाय विश्रामभवनानि, होटलानि नयनाभिरामाणि इतस्तश्च धावन्तः श्रमिका बसाभिमुखं समाययुः । बसोऽपि निस्वनिकां कृत्वाऽतिष्ठत् । मेघजलाभिषिक्ताः राजपथेष्वारूह्य बसं ततोऽवरूह्य च स्व वस्तुसंभारानवतारयितुभुत्सुका यात्रिणो इतस्ततो वेगेनैव प्राचलन् । वयमपि स्व वस्तुभारवाहकैरवतार्य एकतः स्थिता द्वयं श्रमिकं निर्णीय क्लबस्य पृष्ठभागे धर्मार्थट्रस्टे सम्भारान्नेतुमादिदेशिम । ततस्तत्पृष्ठलग्ना प्राचलाम । श्रमिकोऽपि पहलग्रामीय हट्टशालामतिक्रम्य आरोहणमार्गेऽगच्छत् । श्रान्तत्वादति रमणीय दृश्यावलोकनेऽपि विरक्ता । यथा कथञ्चित श्रमिकमेवान्वगच्छाम ततो कलबस्य पृष्ठभागे काष्ठावरणेनावृत्तं वृहतक्षेत्रं गर्जन्त्या वितस्तायातटामलग्नं पर्वतोपत्यकमासादितास्तत्र भारवाहकेभ्य श्रमिकं दत्वा तं व्यसर्जयाम ।

तत्र कानिचिद् पटमण्डपानि उत्थापितानि आसन । अस्मत्कधनमनुमन्य अधिकारिणः अस्मद् निर्देशे मण्डयौत्थापनव्यवस्थां चक्रुः । स्वसम्भारादाय तस्मिन्पटमण्डपे आस्तरणानि समुद्घाट्य विस्तार्यं तत्रैव अतिष्ठम् । तत्कालमेव प्रीतम पत्न्या स्टोवः प्रज्वलितः, दुग्धचूर्णं सिताञ्च गृहीत्वा चायपेयं सज्जीकृत्य मह्यं समर्पयद्हमपि मिष्टान्नचूर्णं झोल्कान्निसार्यं ताभ्यां मुष्टिद्वयं प्रदाय स्वचायपानं अभ्यवहरम् ।

सप्त वादने नदीतटे गत्वा पश्चिमां सन्ध्यामुपास्य पुनः पटकुटीरे आगत्य अस्वपम् । किन्तु स्थानस्य नवीनत्वान्निद्रा न समागता । आवर्तं प्रत्यावर्तनैरेव निशा व्यपगता । अभ्युत्थाय शौचादिकं विधाय, दन्तधावनपूर्वकं स्नात्वा, स्वासनं समागत्य चायपेयं गृहीत्वा प्रभुस्मरणे प्रवृत्तः । तदनन्तरं श्री अमरनाथ यात्रायै भारवाहकं, घोटकरक्षकं प्रदेयं दत्वा, सार्थिना घोटक व्यवस्थां कृत्वा द्विवादनकाले प्रत्यागतः ।

मामलेश्वर दर्शनम्

ततोऽहं मीलमितायां हट्टशालायां भोक्तुं गतवान् । ततो मामलेश्वर महादेवं द्रष्टुं गतः । पहिलग्रामात् मीलद्वयमिते पर्वतकट्यां मामलेश्वर महादेवं भगवतो दर्शनेन श्रमोऽपगतः । उत्सादति शीतला च जलधारा निस्सरति मन्दिर पादलग्ने कुण्डे प्रपतति । तत्र च हस्तपादौ प्रक्षालयाचम्य अञ्जलिना सलिलं पीत्वा हस्तौ प्रक्षालय कुण्डोपरि सौपानद्वय मारूह्य मन्दिराभिमुखं गत्वा विशाल शिवलिङ्गं दृष्ट्वा प्रणम्योदतिष्ठम् । मन्दिर द्वारं तु विकटशिलाभि निर्मितमासीत् तदैव पुजारिराधाकृष्णः समायातस्ततो भगवत्चरणोदकं गृहीत्वा तमपृच्छम्-मामलेश्वरेति नाम कथं जातं, तेनोक्तं मनसेप्सितं पूरयति, अथवा लक्ष्मी ददाति ततो मामलेश्वर उच्यते । निर्वचनेनानेन सन्तुष्टिस्तु न जाता, परन्तु ब्रह्मवाक्यं जनार्दनं मत्वा इति तं नमस्कृत्य कुण्डादपसृत्य पुष्पवाटिकावृते मन्दिर प्रवेश मार्गे एकतो वाटिकालग्ने लम्बकाष्ठोपवेशनद्वय आसीत् । निपुण निरीक्षणेन तत्र के. एल. बग्गा पूसा रोड नई दिल्ली लिखितं पठित्वा अलाहवादीय परिवारस्य स्मृति नेत्रपथेऽवतीर्णाऽभवत् ।

किञ्चिद्विश्रम्य तद्रमणीकतयाऽतृप्त इव ततोऽपासरम् । मार्गे वितस्ता लङ्घनाय लोहरज्जुधृत सेतौ दृष्टिर्निपतिता, तदुपरि किञ्चिदान्दोलितः वितस्ता सलिलसीकर मिश्रित पवन स्पर्शेन उद्धत रोमकोपः समायातः । ततोऽवतीर्य क्लबमार्गं पृष्ट्वा पञ्चवादनावसरे स्वनिवेशनं समागतः । कृष्णलालाय पत्रमलिखम् ततश्चायपानंकृत्या नित्यकृत्यं सम्पाद्य प्रास्वपम् ।

✿

ततः प्रभातायां रात्र्यां समुत्थाय, कृतनित्यक्रिया स्वासने स्थित्वा निष्कुलीकृत फलानि आदिभि प्रातराशं कृत्वा लेखने प्रावर्तम् । मध्याह्नोत्तरं एकवादनावसरे शूल्कघोटकयोः स्वामी आगतवान अकथयच्च मम काचित् मुद्रा देयं यतोऽहं भोजनादि व्यवस्थां कुर्यामि । तच्छ्रुत्वा मयोक्तं यन्मम पार्श्वे दातुं द्रव्यम नास्ति । अस्माकं व्यवस्थापकः यदादिशति तदेव विधास्यामि नेतरत् । स एव दानादाने समर्थः, तत्पार्श्वे एव पणादिकं विद्यते, मत्पार्श्वे न विशेष द्रव्यं विद्यते । किन्तु याचना प्रवृत्तस्य तस्यानुनयादिन। द्रुतचित्तोऽष्टाणकं चायपेय निमित्तमदामेव । तस्मिन्निवृत्ते एकाकी पटकुटीराद् बहिरागत्य अपश्यम् भूमिमिमामभितः उच्च शृङ्गशृङ्गैरावृतां मेघाच्छन्नां दृष्ट्वा आह्लाद-मनुभवम् । शिखरमध्ये वितस्ता जलमालानुलग्न नितरां सुखदां समतल दशवर्गं मीलमिता वसुन्धरामातपेन स्मेरमुखामिवाहश्यत । सर्वतः पर्वत कटितटमधोऽधः क्षेत्राणि मक्की आदि प्ररोहैः सुन्दरतराण्यशोभन्त् । अस्माच्छिवरैकतः चन्दनबाड़ी राजमार्गो कारजीपानां गमनागमनेन वितस्ता ध्वनिमनुकरोति स्म ।

तदैव रंगमञ्चीय पटपरिवर्त इव सहसा घनघटाटोपाच्छन्न आकाशः सञ्जातः । तडित्वतां संघर्षेण विदीर्यमाण पर्वतानाम तुमुल निनादेनेव हृदयं च कम्पे । सर्वतः पतन्त्यो जलधारा एव अभिद्रवन्त्यो दृष्टिपथमायाता । मुहूर्तमात्र एव न जाने क्व निलीना नीलमेघा पर्वतशिखरानेवालिङ्गतो पहलग्रामीय मध्याकाशों तिरोहिता जाता । सन्ध्या समयो निशान्त शान्तो रमणीयश्चजातोऽहमपि प्रत्यागतः स्वसार्थिनौ समापृच्छ्य यात्रोपयोगि कानिचिद्वस्तूनि क्रेतुं हट्टशालाम-गच्छम् ।

अर्धसेरकमितं पक्वान्नं, लोहकीलखचिता यष्टिं क्रीत्वा, द्विदलं रोटिकामादायैकतः उपविश्य अभुञ्जम, देयद्रव्यञ्च भोजनविक्रेत्रे दत्वा स्वस्थानं यातुं प्रावर्तम् । मार्गे स्वर्णशिखरं शिवमिन्दर प्राङ्गणे स्थिता महासम्मर्दो स्वोपवेशनस्थानेषु स्थिताः शिवनीराजने निरता आसन् । सहस्रशा कण्ठेभ्यः निस्सृतशिवस्तुति विस्तीर्यं सुदूरतर प्रतिध्वनिता च प्रसृताभूत । भेरीडमरु ढक्का घण्टा मुरलीशंखध्वनि भूतलादुत्थाय जनहृदयान्तराल भावनानुद्बोधयितुं प्रयत्नं उज्जयिन्यां सन्ध्याकालीन आरतीप्रसङ्गः स्मारयति स्म ।

◆◆◆❋◆◆◆

चन्दनबाड़ी पर्यन्तम् यात्रा

प्रातः पञ्चवादन एव समुत्थाय, शुष्कदीपनलिका सहायेन च स्नात्वा, संक्षिप्तां सन्ध्यामुपास्य प्रतिनिवृत्तः, कृतनित्यक्रियौ क्षिप्रमेव प्रत्यागतः। स्वास्तरण सम्भारान्बद्ध्वा पटकुटीराद् बहिः श्रीअमरनाथ यात्रा समुत्सुका अतिष्ठम्। तदैवोनाष्टवादन वेलायां त्रयो घोटकाः सज्जिताः स्वामिना प्रेरिताः समागताः। एकस्मिन भारवाहकघोटके वस्तुसंभारमुद्वाह्य स्वघोटके आरोहण समुत्सुका इतस्ततः शिविरे, यात्रा-समारोहे यात्रिणां कोतूहलपूर्णं कोलाहलं श्रावं श्रावं काञ्चिदुत्सुकता-मन्वभवाम। ततः रक्तवर्णं राजू नामकं घोटकम् समारोहम्। तदन्यं गौरवर्णं वयस्कं मुरिया नामके घोटके प्रीतम पत्नी समारुढ़ा। ततो राजू घोटकः चापल्येन सह स्वबुद्धिमतां प्रदर्शयन्प्राचाचाल शिविर काष्ठसीमातो द्वारमार्गे शिविरलग्नजलकुल्यामुल्लंघ्य राजपथे प्रवृतः, घोटकपंक्तयः मिलितः। आदि अन्त रहितैषा घोटकपंक्तिः विसृमरा भवति स्म। क्षणे क्षणे च मध्ये च पालकीवाहकानां समापतने च महान्सम्मर्दाः कोलाहलश्च सम्पद्यते स्म। पृष्ठगामिनां घोटकानां सहसा अवरोद्धो भवति स्म। समग्रा यात्रा स्थगितेव जाजायते च। ततः महतावधानेन मानवानां पशूनां च बुद्धिकौशलेन पालक्या यथाकिञ्चित् यात्राप्रवाहश्चलन-योग्योऽभवत्। पहिलग्रामतः मीलद्वयमित मार्गसंकीर्णत्वात काठिन्यमनु-भवद्भिः यात्रिभि यथा प्रवर्तिता एव ततोऽग्रेऽसामान्येऽपि आरोहणा-वरोहणेषु क्रमणा घोटक पदयात्रि पंक्तयश्च विरलमभवन। इत्थं मार्गे त्रिचतुषु ग्रामे घोटकेभ्यो विरूह्य जलपानादिकं कृत्वा, विश्रम्य च, पुनः स्वघोटकानारोहन्तः त्रिवादनावसरे चन्दनवाड़्या (चन्दनबाड़ी) समायाताः। तत्र च वर्षाकारणाच्छीताधिक्यमासीत्। सेतुमुल्लंघ्य घोटकाभ्यामवरूढ़ा स्टेशनाद् दक्षिणतो शिविरोऽभवत्। तदैवऽस्माकीनः स्वास्तशणमुद्घाट्य

ततो हट्टेगत्वा भोजनादिकमास्वाद्य, दुग्धचूर्णघोलकं पीत्वातिष्ठम् । अत्र सर्वकारीय स्वच्छताप्रबन्धे सत्यपि दौर्गन्ध्यमनुभवम् । द्वित्रा एव जलनलानि आसन् । नद्याजल नातिदूरे अतिविषमावरोहणेनोपलब्धं आसीत् ।

मध्याह्ने पञ्चवादनावसरे कर्णकुहररूजकरी भूधरस्फोटनेन प्रलयंकर ध्वनिं विदधाना दुर्घटनाऽजीघटत् । परतीरवर्ति पर्वतोच्छ्रय निपातेन अवरतीरवर्ति मलोत्सर्गगृहं टीनाच्छादिनः विशालवृक्षैः निपातेन बभञ्ज । दुर्घटनया सहसाजन कोलाहलोऽवरुद्धोऽभवत् दर्शनाय महान जनसमाजो संघटितोऽभवत्, पञ्चदश मिनटानन्तरं संघो विरलो जातः ।

सायन्तने भोजनशालाभ्यः भोजन व्यञ्जनादि द्विदलं (दालं) भक्तादि समुचित मूल्येनोपलभ्यमासीत् । द्वित्रमुद्रयाश्च तृप्तिः सुलभा काश्मीर सरकार निर्देशेनाभवत् । व्यतीत द्वियामायां यामिन्यां सर्वः समाजः निद्रा निमग्नोऽभवत् । केवल अत्युन्नतविद्युत्स्तम्भैरुद्भूतः प्रकाश एव अजागारीत् ।

सन्द्रसोन्मीलितनेत्रः नलिकादीपेन घटिकामवलोकयम्, परम्भ्रान्त्या त्रिवादनचतुर्वादनम्मत्वा झटिति आस्तरणमुन्मुच्य नलिकादीपं जलपात्रमादाय मलोत्सर्गाय निर्गच्छम् । रात्र्याम्प्रवर्षेण सर्वतः कर्दम एव प्राचलम् । यदा विशालोमार्गे समायातस्तर्हि तत्रैकं भ्रमन्तं रक्षकोऽकथयत् त्रिवादनवेला वर्तते । तदाहमपि मनसि विक्षुब्धो, अनवसरे बहिरागतोऽस्मि, ततोऽपि कियद्दूरे नद्या सेतुं समागत्य मलोत्सर्गं कृत्वा नद्यामवतीर्य अन्धकार प्रौढत्वात् अनुपलब्ध तटः स्नानं विना न्यवर्तम् । पुनः हट्टशालाया दक्षिणे स्नानं कृत्वा स्वोपवेशनं प्रत्यागच्छम् । तदनन्तरं सार्थिनौ समुत्थाय स्नानाद्यर्थं गतवतौ । चायमपिबम् । किञ्चिदूनाष्टवादनावसरे घोटकपति गुर्जरोऽपि समायातः । सम्भारान भारवाहक घोटके उद्वाह्य, स्वस्थानात् किञ्चित्पदभ्यां चलित्वा अगच्छम् । गुर्जरोऽवादीत् तव सार्थिनौ दूरे

निष्क्रान्तौ, एहि शीघ्रं ताभ्याम् सह मिलावः । तदुक्त्यापि क्षिप्रचलनऽशक्तो पुनः कर्दमे, तदुपरि भारयुक्तोपानहो । बलपूर्वकं कर्षन् प्राचलम । अतिसङ्कीर्णे मार्गे सहस्रश प्रचलन्तां घोटकानां शतशः पालक्याम् सहस्रशः प्रचलत्पदातीनां सम्मर्दे यथाकथञ्चिद् घोटकारुढोऽभवम् । ततः द्वित्रिशतपदानि चलित्वेव सहसा यात्राऽवरोद्धः सञ्जातः । महासम्मर्दं निश्चलं दृष्ट्वाऽहमपि स्थिरचित्तऽभवम्, ज्ञातञ्च यदग्रे रचितसोपानेषु शनैः शनैः घोटकाः प्रचलन्ति, अन्यथा तेषां स्खलनेन महानर्थं सम्भावना वर्तते । अविहिता रक्षिणः महतांप्रयत्नेनैकैकं सोपानेषु द्विहस्तमितान्तरे क्रामयन्त आसन् । साहसिकोऽस्माकं घोटकगुर्जरः आवां घोटकेभ्योऽवतार्यं पद्भ्योमेव गन्तुम्प्रावर्तयत, दूरस्थ शिलायामेवोपवेष्टव्यमिति संकेत्याऽसौ घोटकरश्मीहस्तेकृत्वा हिमसोपानमार्गमतिहाय तदुपरितोभागे अतिदुर्गमारोहमार्गेण अचलद् । वयमपि हिमोपरि सम्मर्दे निमग्नः इतस्ततो दुर्गमारोहणावरोहणेषु चलन्तो येन केन प्रकारेण संकेतस्थानमागत्य व्यश्रमाम । तिष्ठत्स्वेवास्मासु गुर्जरः समायातः । उन्नतशिलामाश्रित्यऽऽवां घोटकारूढौ जातौ । मध्ये मध्ये विकट सम्मर्द वशात् विकटारोहणावरोहणात् युगपत्पालकीनां मध्ये समापेतनादवरुद्धगतयोऽभवाम् ।

-:※:-

पिस्सु घाटी

प्रचलति सार्थेऽति विकटारोहणं पिस्सु घाटीं परिलक्ष्य मत्कुणेन इव जागरूकाः सञ्जाताः । अहो कष्टम्, इयत् उन्नत्यं, तुङ्गश्रृङ्गम् कथं लङ्घयितुं पारयिष्यामः । सर्पाकार कुटिलारोहणे लम्बमाना घोटक पंक्ति, पदातिपंक्तिश्च आकाशे लम्बमाना त्रिशंकुरिव दृश्यते स्म । धारौन्नत्यमध्ये गच्छता मया अधोर्ध्वं केगे प्रसर्यमाणा पिप्पीलिका पंक्ति रिवाऽदृश्यत । पद्भ्याम्प्रचलन्तो वृद्धाः, शुष्कमुखा मूकाप्रचलन्ता श्वासोच्छ्वासयुक्ताः पगे पगे आश्रित्य विलम्ब्य विलम्ब्य प्राचलन् । रक्षिणोऽपि विकटेषु मार्गेषु उत्स्वनिकया शब्दायन्तः यात्रा सुव्यवस्थाकार्ये संलग्ना– 'हर हर महादेव', 'अमरनाथः स्वामी विजयताम्', 'बमबमभोले', 'महंगाई मार गई भोले बाबा' इति मधुर रोषं प्रकटयन्ता गायन्ति चलन्ति स्म । स्वयात्रा साफल्याय कामयन्ति स्म । वयमपि क्रमानुसारं येनकेनप्रकारेण पिस्सुघाटीमुत्तीर्णा अभवाम् । अधोवलोकनेन ज्ञातं यत् घोटकानां पदातिनां पंक्तिरद्याप्यवच्छिन्न प्रवाहा चलत्येवास्ति ।

पिस्सुघाटी मूर्धानमारूह्य समाश्वस्तो सिंहेक्षिकया भूधरवक्षस्थले क्रममाणं सार्थं पादतलादुत्थाय कपर्दिकपर्दमारुहन्तमेलापर्णं कुण्डलिनमिवाद्राक्षम् । अथवा वक्षसि लम्बमानां क्षुद्रघण्टिका मालापित्र जनपंक्तिमपश्यम् । माला मध्ये च स्थूल मणय इव डाण्डयोऽदृश्यन्त । द्वितीयं सार्थ निवेशं निकट एव भविष्यति–इति सन्तुष्टिमनुभवन्तं पार्श्वलग्नः कश्चिद्दुवाचाधुना तु द्वित्रामीला एव अतिक्रान्ताः, सप्तमीलमिते दूरे शेषनाग नामक स्थानमस्ति । श्रुत्वैव हृदये धक् धक् ध्वनि इति प्रचण्डोऽभवत् । तत्रैव सर्वंकारीय स्वास्थ्य विभागस्य कार्यक्रमो दृष्टिगोचरं गतः । केभ्यश्चिदाक्सीजनं नलिकाभ्यां दीयते । केभ्यश्चिच्चक्रेन

गुटिकाः वितीर्यंतेऽन्येभ्यश्च रक्तवर्णं मिक्सचरं पाययन्ते । तत्रासन् केचित्पटमण्डपा तेभ्यश्चायं अपूपिकाश्च कचौरीश्च क्रीत्वा खाद्यन्ते स्म। तत्रासन सीमिण्ट प्रस्तर रचिता लम्बायमाना वर्तुला विश्रामगृहा परन्तेषु न कोऽपि विश्राम्यति स्म । सर्वेऽग्रे प्रचलन्त आसन् । ततः मीलद्वयमितं लघ्वारोहणानन्तरं तीव्रावरोहणभारब्धञ्जातम् । तात रे तात ! त्राहिमाम ! रक्ष हे अम्ब ! विकटावरोहणानन्तरं आरोहणम्प्रवृत्तम्भवति कदा समाप्तिमेष्यति अद्यतनीनो मार्गः । मध्ये मध्ये च गिरि प्रस्रवण नदीनां वारिषु गमनं हृदयं कम्पयति, अस्यां–स्थित्यां पर्वतीय घोटकानाम् स्खलनं भवति । अस्थायि काष्ठनिर्मित सेतुमुल्लंघनाय घन सम्मर्दो जाजायते स्म, तदा च महान्कोलाहलम् कुरुते स्म । इत्थमेकमन्यां पपिखामिव गिरि नदीमवतीर्य ततो आरोहणे समायातः कश्चित्पटकुटीरान्, किञ्चिदाश्वस्तस्तर्हि एव केचिन्मनुष्या घोटकाश्च निगृह्य स्थापयित्वा स्थूलतरं पक्वान्नशकलानि वितरन्तो 'अमरनाथ स्वामिनः प्रसादमिति कथयन्ति । घोटकेभ्योऽवतार्य सर्वेभ्यां चाय व्यवस्था कुर्वन्ति स्म । गुर्जरोऽवोचत् इहैव भवन्तोऽवतरन्तु, अहं भावन् नेष्यामीति । परन्तु सार्थनिवेशोऽग्रे, कर्दमान्विते मार्गे संलग्ननदीसेतुमवतीर्य पारं गतवान । तत्र धर्मार्थं ट्रस्टस्य शिविरस्य अभावः आसीत् । महती समस्याऽग्रे समायाता, मेघोऽपि शीतलेन पवनेन मन्दं मन्दं प्रवर्षति स्म ।

-:※:-

शेषनाग शिविर वृत्तान्तम्

यात्रिणां शिविरं दूर पर्यन्तं विततमासीत् । अहमपि धर्मट्रस्टस्य शिविर मितस्ततोऽवलोकने कृतश्रमा आसम्, परन्तु न क्वापि दृष्टि पतितम् । ततो राजमार्गानुलग्ने एकास्मिन् रिक्ते पटमण्डपे न्यविशम् । सार्थिपत्नीं तत्र स्थापयित्वा, पार्श्वस्थ किञ्चित्संभारद्रव्यं तत्पार्श्वं एव निधाय सहचरेण सह धर्मार्थ ट्रस्ट शिविर मन्विष्यमाणा अभ्रमम् । प्रवर्षणाद् हेतोः प्रस्तरशकलाविलमुत्कट कर्दमे चलितुमशक्तोऽपि अनन्य-गतिकतया सुदूरतरं विस्तृते शिविरे अन्वेषण कार्ये दत्तचित्तोऽभवम् । तदैव एकशिविराधिकारिणो निपुणेन निरीक्षन्–भो इहागत्य चायपानञ्च क्रियतामिति । बहुधावाचः शृण्वन अधुनैव समागच्छामिइत्येवं उत्तरं ब्रुवन् स्वाश्रयणीयो शिविरं द्रष्टुमौत्सुक्यमवर्धत् । विफल प्रयत्नः तमेव पटमण्डप-मगच्छम् । तत्र निषण्ण एव मयि, एक आङ्ग्लदेशीयः समागच्छत्, अब्रवीच्च–सप्तक्रमीयः एष पटवितानः, मह्यं पूर्ववतएव प्रतिव्यक्ति शतमुद्रा शुल्कदेयेन नियतीकृत इति । मयोक्तमस्माकं पटमण्डपस्य व्यवस्थाऽस्ति । यदैव तं द्रक्ष्यामस्तदैव तत्र गमिष्यामः, स्वस्मै नियतीकृत पटमण्डपे निवास करणीयः । इति मदुक्ति शिरः सञ्चालनेन स्वीकृत्य ततो निर्गतः क्षणादेव च स्वपत्न्या सह प्रत्यागतश्च, स्वास्तरणमास्तीर्य ततोपविष्टे तस्मिन् पत्नी तं समालिङ्ग्य प्रीत्या तत्पृष्ठं सम्ममार्ज, सोऽपि तां वक्षसा निपीडय स्थितः । तादृशी एव तयोः संस्कृतिरिति मत्वा तद्दृश्यमदृष्टमेवाकरवम् । अन्येऽपि केचित् व्यक्तयः तत्र भ्रष्टान् स्वसार्थिनः प्रतिपालयन्ति स्म । इत्थं विरभ्य किञ्चित्पुन : स्वशिविर निरीक्षणाय अयतम् ।

अधुना तु एकस्य टीनाच्छादित भवनस्य पार्श्वे काश्चित् धर्मार्थ ट्रस्ट कार्यकर्तृन स्वपटमण्डपनिवेशने कृतश्रमानपश्यम् । तत्रैव च स्थित

स्वसार्थिनमवलोकयम, तदनन्तर स्वसम्भार द्रव्याणि गृहीत्वा प्रीतमोऽपि आगतवान, आशुतरं स्वश्रमिक सहायः एकतः एकः पटमण्डपं विततान। तदा स्वास्तरणमुद्‌घाट्य उष्णमुष्णञ्चायेन किञ्चिदुपभुज्य श्रान्तक्लान्ततया चेतनाशून्या एव निद्रामुपगताः।

सर्वा च रात्रिस्तड़ित्–स्फोटन–गर्जन–प्रवर्षणैरेवातिगता। षटवादन ममुत्थाय नलिकादीप सहायः मलमूत्रादिकमुत्सृज्य, नद्यां स्नात्वा, संक्षिप्य संध्यामुपास्य, ब्रह्मजपत्वा, यथोपलब्धाहारतृप्ताः आस्तरणानि संकलय यात्रायै सज्जा अभवाम। तर्हि सर्वकारीय डिडिमघोषः सञ्जाता यत्प्रवर्षणेन गन्तव्य मार्गो व्यत्यस्तः कोऽपि यात्री अग्रे प्रवर्धितु साहसं न कुर्यात्। अग्रिमादेशावधिको यात्रा निरोद्धोऽवगन्तव्य इति सर्वेऽपि यात्रिणो श्रुत्वैत्र निभृता अभवन्। किल सार्धाष्टवादने सञ्जाता, दशवादनात् पूर्वमेव यात्रिभि मार्गोवलम्बनीय इत्येष डिण्डिमंघोषोऽभवत्। श्रवणकालमेव आवां घोटकारूढ़ौ प्रचलाव। किन्त्वस्मत्गमनात्पूर्वमेव यात्रि-पंक्तिः सुदूरतरं निष्क्रान्ता आसीत्। अस्माकं घोटकवाहकोऽपि इतस्ततः मार्गानतिक्रामन् साहसिकतया घोटकौ पङ्क्त्यग्रे सञ्चालितवान।

प्रथममेकं काष्ठसेतु क्रमण पूर्वकमतिविषममारोहणेन चित्तमुद्-घूर्णितम्, यत्कथमस्य पारमेष्यामः तथा च प्रत्यावर्तने एतानि विषमा-रोहण।वरोहणानि भविष्यन्ति तर्हि कथमिमं मार्गमतिक्रमिष्यामः। इत्थं चिन्तयनेवारोहणान्ते अद्‌भुत दृश्येषु मनोलग्नं सर्वमात्मगतं विपत्तिनिचयं सम्भावत्तातो मुक्तं जातमहो अभ्रलिहंगिरिशृंगः, गिरिनदी क्व गता, निःस्वना कथं जाता। तदैत्र मीलमिते दीर्घे हिमाच्छादिते नदी मार्गे दृष्टिर्गता तदाववुद्धः यदहो हिमान्याप्रावरणेनाच्छादिता नदी सुषुप्त्यानन्द-मनुभवति। शैलशिखरा अन्योऽन्य स्ववितते भुजै समाष्वजन्ति। आवक्ष-स्थलञ्च कक्षेषु हिमोच्छ्रयैश्च पूर्णान् दृष्ट्वा मनसि चिन्ता जाता यदेष यात्रिसार्थं कुतः मार्गं लप्स्यते, शिखरावरणन्ववीहृगेयासीत्।

किन्तु तदैव तीक्ष्णावरोहणे प्रारब्धे समाहितं चित्तम् घोटक पर्याण दृढ ग्रहणे संलग्नमभूत् । आरोहणे स्वकायभारोऽग्रे करणीयो भवति, तदावरोहणे स्वफायभारः पृष्ठे करणींयो भवति स्म । स्वशरीरस्य सन्तुलने निमग्नं न किञ्चिदपि व्यचिन्तयत्, नासिकाग्र विलोकनं विनैव पतनभयान्मनः स्थिरं जातम् । घोटकपृष्ठविलग्नो घोटकाङ्गमिव कृतवान् । किञ्चिद्दूरं विषमारोहणादवतीर्यं विश्रामाय घोटकपृष्ठादवारुहम्, पुनः घोटकारूढः प्रसरम् शैलकटिभागानुसृते मार्गे । आदि अन्तरहितो यात्रिसाथः प्रचलति स्म । निकटवर्ति प्रतीयमानमपि पर्वतीयस्थानं गमनेन सुदूरतरमभवत्–पर्वता दूरतो रम्याः-इत्युक्ति यथार्थैवान्वभूयत् ।

पर्वतावृत संकीर्णमार्गान् निष्क्रम्य विस्तृतं नद्या क्षेत्रं दृष्टिपथ-मवतीर्णम् । यथा यथा नद्या समीपे गतः तथा अनेका गिरि प्रस्रविण्यः विविध मार्गैः समागत्य तत्र मिलन्ति स्म । मार्गान्ते एकं काष्ठमयं नदीसेतुमवतीर्य पञ्चतरणीपारङ्गतश्च त्रिवादनावसरे पञ्चतरणी शिविर-मनुप्रविष्टा । अस्माकमवतरण समकालमेव असौ वाहकः घोटकौ चारयितुं पर्वत शिखरं जगाम । इत्थं शेषनागात् पञ्चतरणी यावत् दशमीलमितं मार्गं सप्तहोरासु व्यतिक्रान्तमभवत् ।

पञ्चतरणी शिविरं

अत्रावतरणसमकालमेव खालसाहोटलाभिधे भोजनालये स्वपात्रे द्विदलं (दाल), पुष्कलानि द्वित्राणि गृहीत्वाऽखादम् । अत्र शुचिता धर्माङ्गरूपेण न केनचिद ज्ञायते स्म । प्रत्येकस्मै पुष्कलाय शुल्कमासीत्, द्विदलस्यापि रूप्यकं देयमासीत् । विविध शाकादिकृते सार्धमुद्रा देयमासीत् ।

धर्मट्रस्टस्य शिविरनिवेशं ज्ञातुं प्रायतम्, न कोऽपि तत्परिचयं दत्तवान । सार्यया सह प्रीतममन्वेष्टुं द्विवारमितस्ततऽभ्राम्यम् परन्तु तौ न दृष्टिपथमागतौ । प्रष्टुं तहसीलदारस्य कार्यालयं समागच्छम् । शीताधिक्येन आर्तो प्रवर्षणेन च क्लिन्नः, क्वचिद् विरमन्तुमैच्छम् । तहसीलदारस्य बहिरकोटं (बरामदा) अपि विश्रमद् यात्रिभिरित्थम्पूर्ण-मासीत्, यत् कुत्रापि रिक्त स्थानं नासीत् । ततो देहली काष्ठे आश्रित्य इव अतिष्ठम् । मध्ये मध्ये च युवक तहसीलदारः चेतावनी ददाति स्म । भवन्तः स्थानमेतद् रिक्तं कृत्वा गच्छन्तु, नात्र कोऽपि विश्रामिष्यति । इतस्ततो भवद्भिः स्वनिवासाय प्रबन्धो विधेयः । इतो कियद्दूरे सर्व-कारीय प्रबन्धो केषुचित् पटमण्डपेषु भविष्यति । अधुनैव भवन्तो यान्तु इत्यादि । अस्मिन्नेवावसरे बहुमूल्य सर्वकारीय प्रावरणा (पटमण्डपाः) तहसीलदारमुपगताः । अहमपि शुल्कं प्रदेय सर्वकारीय पटमण्डपे निवासाय अकथयम् प्रवर्षणे, अन्यत्र गन्तुं नैच्छम्, परन्तुनेनिर्ममं बहिर्गन्तुमत्रोचन्त । तदैव निकटे सूचना प्रसारण केन्द्रे सूचना दीयन्ते स्म । अहमपि तत्र गत्वा प्रीतमाय सन्देशं कारितवान्, यदसौ मामत्रैवामिलित् । किन्तु पञ्चदशमिनटावधिक तत्सूचना प्रतिकारो न जातः । ततो निराशः पुनः धर्मार्थट्रस्टोपनिवेशं ज्ञातुम्प्रावर्तम् ।

सर्वकारीय चिकित्साकेन्द्रे प्रश्नेन ज्ञातं यत्तन्निवेशः ततो मीलमिते दूरे नद्यास्तटे यत्र च छड़ीमहेश्वरस्य साधुसन्त यात्रिणां शिवर निकटेऽस्ति। ततोऽहम् उपत्यकोच्छ्रायमतिक्रम्य पङ्किलेन मार्गेण तत्स्थानं गन्तुमभ्याक्रमम्। अर्धमीलमिते स्थानेऽतिक्रान्ते मयि-एकः साधुरकथयत्-भो नास्तीतः धर्मट्रस्टीनां निवेशो, एहि मया सह अहम जाने यत्र ट्रस्टि शिविरं वर्तते। अहोमन्दभाग्यता इति मनसि कल्पयन तेन सह प्रतिगन्तुं प्रवृत्तः परन्तु तहसीलकार्यालयस्य पार्श्वे यदाहं गतवान् तदा साधुस्तु दूरं निष्क्रान्त आसीत्। केचित ट्रस्टीपुरुषा तत्र भ्रमन्तोऽपश्यम-क्व शिविरं निवेष्टव्यमिति, तान्दृष्ट्वा दृष्टस्तानपृच्छम्। तदा विमृश्य तहसील बङ्गला समीपे शिविर निवेशोऽस्ति तत् स्थानं यदैवाहं गतवान् तत्रैव प्रीतमः स्थित आसीत्। तदैव पटमण्डपवोढारः घोटकाः समायाता। एक पटमण्डप गृहीत्वा वितानितः भारवाहकाद् स्वास्तरणानि गृहीत्वा तान्वितत्य विश्रामम कृत्वैव सायन्तनीन क्रिया संक्षिप्य, समाप्य, हरिं स्मृत्वा प्रसुप्ताः। प्रवर्षणञ्च सर्वस्य रात्र्यां प्रावर्तताम्, शीताधिक्यमनुभवम्।

अमरनाथगुहामार्गम् दर्शनञ्च

प्रातः पञ्चवादनावसरे आस्तरणानि परित्यज्य कृतावश्यकृत्यौ सम्भारान् आबद्धय भारवाहकाय समर्प्य च वयं द्वादशवादनात्पूर्वमेव अमरनाथ स्वामिनमभ्यर्च्य समागमिष्यामस्तर्हि तस्मिन्नेव समये प्रतिनिर्वतिष्यामः, इति कथयित्वा पूर्वामकल्पिता सामग्रीं लोहकीलकायष्टि ममादाय पद्भ्यामेव महेश्वर गुहापर्यन्तं गन्तव्यमिति, पर मुत्साहं धैर्यञ्च मनसि संकलय्य–प्रतस्थिम । कियद्दूरन्तु महतसाहसेन प्राचलम्, परन्तु यथा यथा विषमारोहणम्पिस्मु घाटीतोऽपि अधिकमत्यारोहम् तदा तदा धैर्यं क्षीणं जातं स्यात् । सर्वान्तिरयामी–अमरनाथस्य दर्शनन्तस्य अनुग्रहेण तच्छक्त्यैव च भवति इति मन्यमानः शनैः शनैः प्रावर्तमेव । सद्यः प्रवर्षणेन कर्दमबाधा स्वभाविकामीत् । यात्रा पंक्तिरपि दूरतरं प्रचलन्त । यथा कथञ्चिद् पञ्चदशसहस्र फुटोन्नत्यमतिक्रम्य वार्धक्याच्छिथिलमपि अतिश्रमत्वादधिकं त्रुटितं शरीरं वस्त्राच्छादित पुत्तलिक इव चलति स्म ।

अहो डण्डिवाहिनां हस्तेभ्यो भ्रष्टा पालकी तदारुढा वृद्धाया किञ्जातमिति द्रष्टुं नोत्सहे । अहो एषा जीवन्ती, चलन्ती वृद्धा काष्ठखण्डमिव विकरालगह्वरे पतिता । तदैव केचिद्युवानः दर्शन कृत्वा प्रतिनिवर्तन्ते स्म, ते च समीपमायाता नातिदूरं धैर्यमवलम्ब्यताम् इति उत्साहन्तः प्रतिजग्मुः । इमे भाग्यशालिनः दर्शनं कृत्वा प्रत्यायान्ति, इति विस्मयमावहन् वृद्धानां कृते एषा यात्रा न समुचिता । किन्तु नग्न–पद्भ्याम्प्रचलतः काञ्चित्साधु यात्रिणः दृष्ट्वा तेषां साहसं प्रशंसन् 'हर हरमहादेव',–'अमरनाथः स्वामी विजयताम्',–हर हरगङ्गे कैलाशवासिन् ! तव द्वारमागता, देहि दर्शनम्, तव दर्शनाय श्रमिष्यामः इति विधान जयनादान् श्रुत्वा तदनुमोदने मुखाच्छब्दो निस्सरति स्म । अद्भुतानि दृश्यानि अतिक्रामन्ति स्म ।

शिखराहिमाच्छन्ना शिवस्य अट्टहासं अनुकुर्वन्तो मनोलोभयन्ति स्म। अहो एताकिम् हिमोपरि उत्खनितेषु सोपानेषु प्रचलामि । अहो इमे साहसिकः हिमसोपान मार्गमतिहाय हिमाच्छादितनद्या उपरि कूर्दन्त इव प्रचलन्ति ।

तदैव दर्शनं कृत्वा प्रत्यागच्छत आङ्गलान् अपृच्छम्, कियद् दूरं वर्तते गुहा, स्मितं कृत्वा, सार्धमीलद्वयमितो विद्यते गुहा सा । श्रुत्वैव काठिन्येन हृदयं संस्तभ्य अचिन्तयम्-यत् कार्यं साधयेयं वा शरीरं पातयेयम् वा । क्वचित्तिष्ठन् क्वचित् शिलामाश्रित्य, क्षणमात्रं ततोऽग्रे प्राचलम् । अहो नद्या गर्जन कर्णौ स्फोटयति । अहह नदीनिलीना प्रसुप्ता किम् । कदाचिन्मनसि महेश्वरमभ्यर्थयम् भगवन् किन्तव दर्शनं कृत्वा पुनः स्वपरिवारेण मिलित्वा स्वजीवनस्यावशिष्टान् कार्य-क्रमान्पूरयिष्यामि ।

इत्थं गच्छन्नेकपर्वतो समुल्लंध्यापश्यम् यन्नद्यां जनाः स्नानं कुर्वन्ति । तद्दृष्ट्वा समाश्वासो जातः यन्निकटे समायातो गुहायास्तत्रैव सहचरदम्पती स्नानं कृत्वा दर्शनाय सज्जीभूता आस्ताम् । केचिद् युवाभ्यामत्र स्थैयं मम वस्त्राणि पश्यत, अहम स्नात्वा समागच्छामि, इति त्वरित त्वरितया वस्त्राणि उद्घाटय स्नातुं गतः । यावत्स्माकं लोहयष्टिमादाय कश्चिन् साधु नद्याः पारं गतः, यावदसौ निवृत्य समागतः, देहि मे यष्टिमिति श्रुत्वैव नदीपारतः यष्टिं चिक्षेप. तद् गृहीत्वा वस्त्राणि धर्तुमुद्यतः तदैव दम्पती अवोचत्-शीघ्रामगम्यतां तत्र पंक्तिर्लगति, यथापंक्तौ प्रविष्टयोः शीघ्रं दर्शनवारं भविष्यति । अतः शीघ्रमागन्तव्यमिति प्रचलितो अहमपि कूर्मगत्या रजतगिरिदृश्यान्यवलोकयन् गुहायन्तरतो घण्टाध्वनिमशृणवम्, मीलमिताद्दूरात् दृश्यमानां कन्दरां अमरेश्वर दर्शनम्प्रति आशान्वितो जातः । यद्यपि जङ्घयो प्रचलन शक्तिरतिशयेन क्षीणा आसीत् तथापि दर्शनोत्सुक्येन चैतन्यशक्तियुक्तः येनकेनप्रकारेण जङ्घे अचालयदेव । यातायात

प्रवर्तमाना–जनपंक्तिः पिपीलिका-पंक्तिरिव–अनवच्छिन्न सम्बाधकारणमन्थर गत्या प्राचलत् । महानजनसमूह एकत्रितोऽतिष्ठत्, तस्मिन्केचिद्दर्शनं कृत्वा प्रत्यगच्छन्. केचिद्दर्शनोत्सुका, दर्शनविधि जिज्ञासवो वा सन्ति । दर्शनं कृत्वा परावृतौ ममसार्थिनौ मां त्वरयितुं आगन्तुं निर्दिश्य, आवामत्रैव तिष्ठावो भवन्तं प्रतिपालयावः ।

अहमपि आन्तरिकं सर्वं धैर्यं संकलय्य प्रचलितुमुदतिष्ठम्, किन्तु द्विशत पदानि चलित्वेव आरोहणाय दीर्घवितत सोपान परम्परां निशाम्य हृदयगतिनिरुद्धेव जाता, किन्तु क्षीणेस्नेहे दीपाशिखेव मे साहस ज्योति प्रज्वलितासीत् । अतिविस्तृत सोपान परम्परया मध्ये यातायातं सहायतार्थं दृढ़स्तम्भेषु लग्नां दीर्घरज्जुमवलम्ब्य कुतश्चिदेकत. आश्रित्य, कुत्रचित् क्षणं स्थित्वा, लोहयष्टिमवलम्ब्य प्राचलम् । रक्षिणः यातायातँ स्ववाम-कक्षे प्रचलतुं प्रेरयन्ति स्म, आरोहणावरोहणे च वृद्ध–कृशान्–जवान् उत्थापयन्ति स्म, सान्त्वना वचनैश्च आश्वसन्ति स्म । श्वासोच्छ्वासेन विकलः नीचैरवरोहन्तीमन्यत आरोहन्तीं यात्रिपंक्ति दृष्ट्वा, कदा द्रक्ष्ये अमरनाथ स्वामिनंम्, धन्या इमे दर्शनेन कृतार्थाः परावर्तन्ते इति चिन्तयन्नेव कुण्डलिनाकारेण कुटिले सोपानमार्गे गच्छन् अकृत्रिम विशाल गुहा मुखस्यैकतः स्थितस्य कस्य व्यक्तेः पार्श्वे पदत्राणवमुच्य न्यदधाम, अन्येऽपि बहवो जना तत्पार्श्वे आवश्यकताऽतिरिक्तं सम्भारान् संस्थाप्य चिन्तामुक्तो नग्नपादो गृहीताभ्यर्चन सम्भारान् अग्रे प्रावर्धम् । पादौ हिमेन जड़ावभवताम । कथञ्चित्साहसं कृत्वा दिदृक्षित स्थण्डिलमारूढोऽपि जनानामाघात प्रतिघातम् कथमहं नारिकेलेनसह अन्य बिल्व पत्रादिकं सम्भारान् समर्पये महेश्वराय । तदैव हिमलिङ्गोपरिप्रक्षिप्तां सामग्री उपरि लुण्ठितुम् प्रवृत्ता केचित्साधवः हृदे निमज्जन्त्युन्मज्जन्ति च । तेषा-मेतया चेष्टया जनप्रवाह इतस्ततः आन्दोल्यते स्म । एको पञ्चनदीय

युवक उन्मादग्रस्त इव भुजाभ्यामपवार्य जनसमूहं शिवलिङ्गोपरि मस्तकेन बलपूर्वकं प्राहरत् । तन्निरीक्ष्याहमपि हस्तेन हिमलिङ्ग स्पृष्ट्वा, अतीव संक्षिप्तः परन्तु सङ्कीर्णत्वादति भयावह इति, रक्षिणां वचनं निशम्य यात्रिणोऽवहितं, गन्तव्यम मार्गे । अस्मिन्नेव स्थाने सार्धचतुर्दश सहस्र फुटमितमौन्नत्यं शिखरस्य कृष्णबोर्ड लिखितं विद्यते ।

ज्योतिर्मयपुञ्ज इव धवल शिवलिङ्गस्य हिमविग्रहं स्तुतिपूर्वक नमस्कृत्य, उपरिपतन्ती अमृतमिव जल बिन्दून आस्वाद्य, दर्शनात् कृतकृत्यः, तत्र किञ्चित् विश्रम्य, अवरोहणे प्रावर्तम् ।

प्रत्यागमनम्

आरोहणापेक्षयाऽवरोहणे स्वभावतः सुगमता भवति । ततः सहसा वाहक गुर्जरोऽगर्जत् कियदवधिपर्यन्तं तं प्रतिपालये, तव सार्थिनौ पञ्चतरणीं प्रतिनिवृतौ, पुनः प्रत्यागतस्त्वां प्रतिपलये, शीघ्रमारोहघोटकं, अन्यं घोटकम् विनारक्षकमुन्मुच्यागतोऽहं, द्विसहस्रमूल्यो ममघोटको भ्रष्टो भविष्यति । श्रुत्वापि पर्वतशिलामाश्रित्य क्षणं विश्राममकरवम्, ततः घोटकमारूढः मीलमित दूरे पञ्चतरणी स्थाने अपराह्णे त्रिवादनावसरे प्रत्यावृतः । तत्कालमेव पुनरग्रे प्रचलितव्यमिति सार्थिमुखात् श्रुत्वा व्याकुलोऽभवम् ।

तत्र किञ्चित् विश्रम्य निकटवर्ति नद्यातटमन्वगचछम् । तत्र निवृत्य आचम्य च प्रत्यागतः प्रतिपालयतः सार्थिनः पार्श्वे गन्तुं समुद्यतांश्च दृष्ट्वा तेभ्योऽकथयम्-अहन्तु नागमिष्यामि यदि मरणं स्वीकरणीयमेवत्तर्हि अत्र पञ्चतरण्यामेवमतिवचः तस्य पत्नी अपि अन्वमोदत् घोटकवाहकावपि शिथिलौ जातः । तर्हि अस्मत्सम्भार द्रव्यं भारवाहक घोटके उद्वाह्य अध्युषिते पटकुटीरे नीतम् । तत्र स्वास्तरणानि प्रसार्य विश्रमम् । ततः भोजनचायदिपानेऽरुचिप्राबल्यात् न पीतम् । सन्ध्योपासनादिकमपि विस्मृतम् किन्त्वेक द्वि वस्त्रे विहाय न किञ्चिदपिक्लिन्नम् । प्रातःकाले निवृत्य, यथाकथाञ्चितस्नात्वा, सन्ध्यामुपास्य, घोटकौ समारूह्य सम्भारान् स्वसमक्षं भारवाहकघोटके उद्वाह्य यात्रायै प्रचलिता अभवाम् । पञ्चरणीं नमस्कृत्य, महेश्वरं हृदि निधाय गणपति स्मृत्वा त्वरितगत्या पञ्चरतणी क्षुद्र सेतुमुत्तीर्य अग्रे वधिताभवाम् । प्रथमारोहणे प्रवृत्ते शीतल प्रवर्षणेन हस्तौ जडौऽभवताम् । अश्वरश्मिपर्याणश्च क्लिन्नः दुखग्रहो जातः । अनुपदीनावृत्तौ पादौ शीतलजातौ, ऊर्णचोलकेऽपिहिमपाते जाते हृदयञ्चकम्पे ।

अन्योन्यालिङ्गनरतेषु पर्वतशृङ्गेषु यतो यतो दृष्टिर्याति तत्र तत्रैव पर्वतकुक्षयः हिमेन तुन्दिला दृष्टिपथं स्रावयन्ति स्म । कस्यचित्पक्षिणः

कर्कशरवं कर्णकुहरौ स्पृशनर्दयति स्म । तत्र निवसन्ति गुर्जराणां पटमण्डपा तेषां पशवः शिशवः पुनश्चपुनश्च दृष्टिपथमवतरति स्म । एक वारं हरित वृक्षं, स्थूणा–हत्वा गुर्जरमपृच्छम् अहोऽत्र एते द्वित्रा एव वृक्षाः सन्ति नान्ये । स्मितं कृत्वा उवाच भो नेमे वृक्षा स्थूलमूलाजातः । अत्र एतादृशमपि तृणं विद्यते येषां चर्वणकालमेव घोटका म्रियन्ते । इत्थं वार्ताऽनभीष्टः परं समयपरिवर्त सञ्जातः, उपरि हिमान्यातूलकणान्यवर्षन् । आच्छादन वस्त्राणि हिममण्डितानि अभवन् । हस्तौ च जड़ौ जातौ । पर्वतावरोहणं कथं भवति । अहो शेषनागं प्रत्यागतस्तत्सेतुमवतीर्य अकथयम् ।

········नामा प्रसिद्ध ह्रदं सर्वथा नीलवर्णं कुण्डलिनमिव दृश्यते । फणं वितत्योत्थितो शेषो मया दृष्टः, मया दृष्टः इति अचिन्तयम् । पर्वतशिखरेभ्य रजत गिरिनिर्झरा इन्द्रस्य हस्त रजत यष्टयः इव नितराम-राजन्त । किञ्च पर्वतान्नत्य प्रपतिता इमे स्कन्धेषु आवृता रत्नजटिता प्रावरण इव प्रतीयन्ते स्म, नद्याभिमुखमग्रे वर्धित्वा साभिवादनं कुर्वन्तीव । अहो नेत्ररमणीयाप्यस्य प्रदेशस्य हिमप्रवर्षणं वीभत्सा जाता । विशेषतोऽस्य प्रदेशस्य वातावरणे युगपदेव विषामृत मिश्रिताः स्युरवे । ततोऽयं शेषनाग इव विषम शेषनाग नाम्ना प्रसिद्धोऽभवत् ।

श्री अमरनाथ यात्रा हृदि धार्यमाणा इव आत्मानं सुरक्षितं मन्यमाना तदैव सुरसैवातिभयानका पिस्सुघाट्या अवरोहणमापितम् । हे भगवन् ! दयामय त्राहि माम्, कथमवरोहणादवतरिष्ये । तथापि पर्याणसंलग्न कीलकमिव घोटके मन्तोलयित्वा स्थिरं कृतवान् । यद्यपि विषमावरोहणेषु रक्षिणः अश्ववारान् घोटकेभ्योऽवतारयन्ति स्म, मह्यम सौजन्येन च कृश-जवान् मत्वा द्वित्रा स्थले अवतारयत् । तथापि पञ्चदश घोटका अश्ववारै सह निपतिता क्षतविक्षतश्च जाता । स्खलनेन पतितः घोटका स्वचालकाश्च

हमारे अन्य प्रकाशन

१—भारतीय सन्ध्योपासना — पं० चूनीलाल सूदन शास्त्री — १०-००

२—वैदिक साहित्य में शकुन एवं अद्भुत घटनाएं — डा० कृष्णलाल शर्मा 'सूदन' — ३५-००

३—षोडश संस्कार प्रथम भाग (विवाह पद्धति हिन्दी व्याख्या सहित) — पं० चूनीलाल सूदन शास्त्री — १२-००

४—दीपमाला भैयादूज पूजनविधि — ,, ,, — ०-६०

५—श्रीगङ्गा लहरी (हिन्दी व्याख्या सहित) — कविराज पं० जगन्नाथ कृत — ०-५०

६—हिन्दू नित्य कृत्य — पं० चूनीलाल सूदन शास्त्री — १-५०

७—हिन्दू धर्म के दस अङ्ग — ,, ,, — १०-००

८—श्रीराम सन्देश (द्वितीय संस्करण) — ,, ,, — २-५०

९—कुरुक्षेत्र में सूर्य-ग्रहण — ,, ,, — १-००

१०—स्पन्दन (कविता संग्रह) — डा० कृष्णलाल शर्मा 'सूदन' — ७-५०

११—इन्द्र धनुष (काव्य नाटक) — ,, ,, — ६-५०

१२—शाकम्भरी देवी के चमत्कार — पं० चूनीलाल सूदन शास्त्री — ३-५०

१३—श्रद्धा सुमन (द्वितीय संस्करण) — ,, ,, — २-५०

१४—संस्कृति सोपान — डा० कृष्णलाल शर्मा 'सूदन' — १५-००

१५—भगतसिंह चरितामृतम् — ,, ,, — १०-००

१६—काश्मीर विहरणम् — ,, ,, — १०-००

पुस्तकों का प्राप्ति स्थान :

सूदन प्रकाशन

जवाहर पार्क देहट रोड, सहारनपुर